विहितत्वात्। यागार्थगमने च न प्रायश्चित्तम्। अथवा 'श्रुतिलक्षणं प्रायश्चित्तं विध्यपराधे विधीयते' इति न स्मृतिलक्षणमित्येवं सूत्रार्थः। तत्रैवं फलम्। ब्रह्मौदनार्थमौपासनस्सर्व आहितः। पाकात्पूर्वमनुगच्छेत्तदौपासनानुगमनप्रायश्चित्तं भवति। उत्पत्तिस्त्वौपासन विहितैव स्मृतिप्राप्तमयाश्चाग्ने ब्रह्मौदनपाकादूर्ध्वमनुगच्छेदुत्पत्तिस्त्वौपासन विहिता। मथित्वा वा यदि प्रयायादिति। प्रायश्चित्तं नात्र स्मृतिप्राप्तमयाश्चाग्ने पाकादूर्ध्वं। पुनरेव पाकः। तस्माच्छ्रुतिलक्षणं प्रायश्चित्तं विध्यपराधे विधीयते। न स्मृतिलक्षणमिति।

End—Same as No. 2580.

Colophon:

पञ्चमः पटलः॥ इत्यापस्तम्बसूत्रप्रयोगवृत्त्यां तालवृन्तनिवासिकृतायां प्रयोगदीपिकायां हविर्यज्ञस्य प्रायश्चित्तानि समाप्तानि हरिः ॐ॥ शुभमस्तु॥ श्रीमन्महागणाधिपतये नमः। गुरुभ्यो नमः श्रीमत्कमलाम्बिकायै नमः। श्रीमत्यागेश्वरस्वामिने नमः॥ शुभमस्तु॥

Subject: Āpastambaśrautaprayogadīpikā dealing with various Vedic Śrauta Prāyścittas based on the Ninth Praśna (1—5 Paṭalas) of the Āpastambaśrautasūtras of the Black Yajur veda.

Remarks:—The Ms. is in good condition. After the colophon the following is given:—

"उदुत्तम तिष्ठ इत्यादि द्विबहुष्वपि चोह्यते।
उच्छाग तिष्ठ इत्यादेर्द्विबहुष्वेव चोह्यते॥

गर्भद्वित्वे तथा त्रित्वे प्रायश्चित्तं विधीयते ॥ ०

अनीहीनैव मन्त्राश्च प्रयोक्तानि...शपः ॥

उद्धृत्य चावदानानि धातृसूर्याहुतिद्वयम् ।

अष्टस्फोटयुतं निष्कं द्विगर्भे द्वादश प्रभुः ॥

* ❀ ❀ ❀

अवदाने भृगोस्तत्र स्विष्टार्थानवदाय च ।

शिरो नाभ्याः पुरा च्छित्वा स्विष्टैः सह निधाय च ।

यूष्णा कृत्वा तथा त्रय्यं गर्भस्य रसमेव च ।

दैवतादिषु संश्लिष्य व्यवसाया हुत्वा पशोस्तथैव च(?) ॥

पुरोडाशस्य शेषञ्च भस्मनोपसमूह्य च ।

एतं युवानमन्त्रेण वानस्पत्यादिपाशुकम् ॥

यूपे विरूढे प्राप्ते च यस्मिन्यस्य पशोः क्रिया ।

तत्र त्वाष्ट्र उपालभ्यो गणेऽन्यत्र यथाविधि ॥"

॥ आपस्तम्बश्रौतप्रयोगदीपिका ॥

2584. ĀPASTAMBAŚRAUTAPRAYOGA-DĪPIKĀ.

Burnell's Catalogue No. 9139 a. Page 18. Left column. Substance—Palm leaf. Size $19\frac{1}{4} \times 1\frac{1}{4}$ inches. Leaves—10 (94—103). Lines—9 to a Page. Script—Grantha. No. of Granthas—150. Author—Tālavṛntanivāsin. Ninth Praśna. A fragment only.

Beginning :

सहस्रात्ययेऽपि सर्वप्रायश्चित्तमेव निमित्तस्य विद्यमान-

त्वात् । नानधिकारः । अग्नीनामनुगमने हि ति लोके(?) अभ्युदये चाधानं विहितम् । तस्याप्यनन्तरं कर्तव्यतैव नर्तुनक्षत्रपर्वादयः । यो विधिनोत्सृष्टाग्निस्तस्य संवत्सरं परार्ध्यमुत्सर्जनं वर्षासु शरदि वा रोहिणीपुनर्वस्वोराधानं विहितं तस्य संवत्सरातिक्रमे सर्वप्रायश्चित्तं कृत्वा आगामिविहितर्तुनक्षत्रयोराधानं संवत्सरादर्वाक्सङ्कल्पितकालेषु ऋत्वतिक्रमे नक्षत्रमादरणीयं सर्वप्रायश्चित्तं कृत्वा केचिद्वर्षात्यये शरदादरणीयेति । तन्न । केचित् सर्वकालात्यये सर्वप्रायश्चित्तं कृत्वाधानमेवेच्छन्ति ॥

End:

अधिकारे विद्यमाने चातुर्मास्यारम्भकाले अनारब्धे यज्ञविभ्रष्टेष्टिं केचिदिच्छन्ति । चतुर्दशीमिश्रितपर्वणि प्रतिपद्यपराह्णे पिण्डपितृयज्ञो न कृतः । तदा सप्तहोता विनष्टाग्नेः स्मृतिचोदितचान्द्रयणादि कर्तव्यम् । एवं विनष्टाग्नेरुत्सृष्टाग्नेश्चाधानं कृत्वा लुप्तानामिष्टीनां पथिकृति वैश्वानरी च समानतन्त्रे । अनंतरातिविपञ्चञ्च करोति लुप्तानामग्निहात्रेहोमानां सप्तहोता यस्य हविस्त्रिरूपास्ता.....भ्युदेतीत्युक्तम् ।

Colophon: Nil.

Subject: Āpastambaśrautaprayogadīpikā—a fragment only based on 9th Praśna (Prāyaścitta) of the Āpastamba Śrauta Sūtras of tha Black Yajur-Veda.

Remarks:—The Ms. is in good condition. This Ms. contains the following works:—

1.	आपस्तम्बश्रौतप्रयोगदीपिका		LL.
		(9th Praśna—a fragment only)	94—103.
2.	Do.	(10th—15 Praśnas)	125—202.
3.	Do.	(16th & 17th ,,)	221—217.
4.	Do.	(19th ,,)	218—257.
5.	Do.	(21st ,,)	258—271.
6.	Do.	(18th ,,)	272—276.

॥ आपस्तम्बश्रौतप्रयोगदीपिका ॥

2585. ĀPASTAMBAŚRAUTAPRAYOGA-DĪPIKĀ.

Burnell's Catalogue No. 9139 b. Page 18. Left column. Substance—Palm leaf. Size—19¼ × 1¾ inches. Leaves—78 (125-202). Lines—8 to 10 to a page. Script—Grantha. No. of Granthas—4100. Author—Tālavṛntanivāsin. 10—15 Praśnas.

Beginning :

हरिः ॐ ॥ शुभमस्तु ॥

सोमप्रयोग उच्यते । शोधयित्वात्मानं वैराणि प्रशाम्य सर्वपावनानि पवित्रेष्ट्यादीनि यः करोति स सोमयागार्हः । सोम ओषधिविशेषः । तत्साधनत्वात्कर्मनामधेयम् । तेन यक्ष्यमाणः । सोमेन यक्ष्यमाणः यस्य सोमेन यक्ष्यमाणस्य पिता पितामहो वानिष्टप्रथमयज्ञः स ऐन्द्राग्नेनेष्ट्वा सोमेन यजेत । सञ्चयेदसोमयाज्यपीति न तस्य सोमपूर्वाधानम् । तस्या(?)वर्णयति यस्य पितानिष्टप्रथम·

यज्ञः पितामहो वा उभौ स ऐन्द्राग्नेनेष्ट्वा सोमेन यजेत । केचिदन्यतरविच्छेदेनैन्द्राग्न इति पितृविच्छेदेनैन्द्राग्नम् । उभयविच्छेद एवैन्द्राग्न इत्यस्य प्रमाणान्तरमस्ति । अयस्त्यसूत्रवचनम् । "यस्य द्वौ परावसोमपौ स्यातां स ऐन्द्राग्नमुस्रं पुनरुत्सृष्टमालभेत" इति । यस्य पित्रादयस्त्र-योऽप्यनिष्टप्रथमयज्ञाः स ऐन्द्राग्नेनेष्ट्वाश्विनेनेष्ट्वाथ सोमेन यजेत ॥

End:

वत्सापाकरणं रात्रौ मैत्रावरुण्या दोहनम् । पयसां च-विशसनम् । सवनीयस्य शाखाहरणम् । इध्मबर्हिषो-राहरणमिति । एतानि पूर्वस्मिन्नहनि उत्तरस्माह्ने कार्या-णि अहर्गणेष्वेतेषां पदार्थानां द्वयोरेकस्य वाप्यकरणे नमो ब्रह्मण इति जुहोति । चतुर्थीनिर्दिष्टा देवता । सर्वप्राय-श्चित्तं जुहोति । प्रजापतिर्देवता । तत्र श्लोकः ।

शालामुखीयोत्तरवेदिवह्न्यो-
मध्ये रथादेर्गमने तु पूर्वम् ।
उद्वाप्य पश्चान्नयनं प्रदिष्ट-
मिदं तु शिष्टानलमध्य याते [न] ॥

शान्ते रथाप्यौत्तरवेदिके तु
रथादियाने पथिकद्रुणेष्टिः ।
शान्तस्य चाग्नीध्रगतस्तु योनिः
पुरेरितः पूर्वगतस्तु योनिः ॥

Colophon:

दशमः पटलः

एकत्रैव विवृद्धेन(एषा त्रैविद्यवृद्धेन)तालबृन्दनिवासिना ।
सोमपेन कृता वृत्तिः प्रयोगस्य प्रदीपिका ॥

इत्यापस्तम्बसूत्रप्रयोगवृत्तौ तालबृन्दनिवासिना कृतायां पञ्चदशप्रश्नः समाप्तः ॥ समाप्तानि हविर्यज्ञप्रायश्चित्तानन्तरं सोमप्रायश्चित्तानि । हरिः ॐ । शुभमस्तु । शिवाय नमः । श्रीमद्गुरुभ्यो नमः ।

करकृतमपराधं क्षन्तुमर्हन्ति सन्तः ॥

Subject: Āpastambaśrautaprayogadīpikā, based on 10 to 15 Praśnas of the Āpastamba Śrauta Sūtras of the Black Yajur-Veda.

This Ms. contains the following important sections:—

Subject	Praśna	Paṭalas	Leaves
सोमप्रयोगः	X	1-10	125-138
Do	XI	1-5	138-141
Do	XII	1-8	144-154
Do	XIII	1-8	154-169
Do	XIV	1-7	169-182
उक्थ्यः	XV	1	182
षोडशी	,,	,,	,,
अतिरात्रः	,,	,,	183
अप्तोर्यामः	,,	,,	184
अप्तोर्यामसर्वपृष्ठः	,,	,,	,,
सोमक्रयः	,,	,,	185
सोमप्रवाकवरणम्	,,	,,	,,
एकादशिनी	,,	2	186-189
वाजिष्टुस्तोमः	,,	3	189

Subject	Praśna	Paṭalas	Leaves.
प्रायश्चित्तम्	XV	4 & 5	191-202

Remarks:—The Ms. is in a fairly good condition. For the other works contained in this Ms. see the list under Remarks on No. 2584.

॥ आपस्तम्बश्रौतप्रयोगदीपिका ॥

2586. ĀPASTAMBAŚRAUTAPRAYOGA-DĪPIKĀ.

J. L. Collection No. 256. Substance—Paper. Size—10½ × 4¾ inches. Sheets—112. Lines—10 or 11 to a Page. Script—Devanāgarī. No. of Granthas—4100. Author—Tālavṛntanivāsin. 10 to 15 praśnas.

Beginning, end, colophon and subject—Same as No. 2585.

Remarks:—The Ms. is in a decaying condition.

॥ आपस्तम्बश्रौतप्रयोगदीपिका ॥

2587. ĀPASTAMBAŚRAUTAPRAYOGA-DĪPIKĀ.

Burnell's Catalogue No. 9161. Page 18. Left column. Substance—Palm leaf. Size—17⅞ × 1¼ inches. Leaves—183. Lines—7 or 8 to a page. Script—Grantha. No. of Granthas—3800. Author—(?). (Tālavṛntanivāsin?). 10-15 Praśnas—incomplete.

Beginning:

(श्मश्रू)पपक्षवापादि केशवर्जं नखादि च ।
पत्न्याः पादान्तमिष्टं स्याल्लौकिकं वस्त्रमिष्यते ॥

केशवापात्पुरा भुक्ते प्राग्वंशे तु कृते तथा ।
स्नात्वा तु लौकिकं वस्त्रं परिधाय भुजिक्रिया ॥

द्वितीयः पटलः । "आ वो देवास ईमहे" "हवामह" इति पूर्वया द्वारा प्रवेशनम् । प्राग्वंशस्येन्द्राग्निभ्यां वा पृथिवीत्यपरेणाहवनीयं दक्षिणा त्रिक्रम्य । "तं दीक्षाणां+पाहि" इत्युपोपविशति । अत ऊर्ध्वमेष एव सञ्चरो यजमानस्य क्रतुसमाप्तेः कर्मनिपित्ते आहवनीयाभिमुख आस्ते ॥

End and subject—Same as No. 2585.

Colophon :

एषा वैविद्यवृद्धेन+प्रयोगस्य प्रदीपिका ॥

इत्यापस्तम्बसूत्रप्रयोगवृत्तौ तालवृन्तनिवासिकृतायां प्रदीपिकायां षोडशप्रश्नसमाप्तिः ॥

वेदोदिताखिलावाप्तिः सन्मार्गज्ञानहेतवे ।
आपस्तम्बमुनीन्द्राय करुणानिधये नमः ॥

Remarks:—The Ms. is in very good condition. There are two fragmentary leaves in the beginning of this Ms., dealing with śrauta prayoga.

॥ आपस्तम्बश्रौतप्रयोगदीपिका ॥

2588. ĀPASTAMBAŚRAUTAPRAYOGA-DĪPIKĀ.

Burnell's Catalogue No. 9162 (a). Page 18. Left column. Substance—Palm leaf. Size—16⅛×1¼ inches. Leaves—53 (1—53). Lines—6 to a Page. Script—Grantha. No. of Granthas—900. Author—Tālavṛntanivāsin. Sixteenth and Seventeenth Praśnas only

Beginning :

अग्निं चेष्यमाणः अग्निरिति इष्टकाकृतस्थण्डिलमुच्यते। तत्संयोगात्क्रतुरग्निरित्युच्यते लक्षणया। तञ्चेष्यमाणः स्थण्डिलमग्निं गुणक्रतुना यक्ष्यमाण इत्यर्थः। योऽग्निः सोऽङ्गं प्रकृतेतूत्तरवेद्यां चाभ्याग्निप्रणयनं तु विहितम्। "तस्यैषस्वो लोको यदुत्तरवेदिर्नाभिः" इति श्रुतेः। साग्निचित्यक्रतौ स्वयमातृण्णायामग्निप्रणयनम्। तस्माद्विकृत्यर्थोऽग्निर्विकृतिस्वग्न्युत्तरवेद्योऽविकल्पः पक्षिभ्यामित्यादिषु पुनर्विहितत्वात्प्रकृताविप केचिदिच्छन्ति। व्यहं दीक्षापक्षे उखासंभरणपक्षे भृति आमिक्षापर्यन्तानि कर्माणि यथा भविष्यन्ति वसन्ते तथा. पर्वण्युखासंभरणपक्षे। तस्यामेव एकाष्टकायाञ्चेत्तस्यामेवोखासंभरणं कृत्वा पश्चिष्ट्यादि सर्वं वसन्ते। चतुरो मा(सा)इत्यस्मिन्पक्षे एकाष्टकायां न लभ्यते संभरणम्। मासादिकल्पेषु वसन्तात् पूर्वमेव संभरणम्। वसन्तेवाय्यपशुः। एवं स्मृत्वा समारम्भः। कपर्द्यनुसारेण शुल्बोपधानेन साग्निचित्यस्य क्रतोः प्रयोग उच्यते—

वसन्ते पर्वणोरेकाष्टकायां वा प्रातरग्निहोत्रं हुत्वा दर्भान्धारयमाणः पत्नीभिः सह प्राणानायम्य सङ्कल्पं करोति ॥

End:

यस्मादेशाद्भावनं कृतं तत्स्थानमावर्तते न वाय्व्येन पशुनेष्ट्वा संवत्सरादर्वाक्सोमेन यजेत। नान्यासामपि स्त्रीणामुपगमनं क्षत्रियवैश्यविषयः। पक्षिमांसप्रतिषेधः साग्निचित्य उक्थ्यविषय इति केचित्।

समाप्तोऽयं साग्निचित्यक्रतुः ॥ तत्र श्लोकाः—

यदात्वनभिषेकः स्यात्संपातावनयोर्न हि ।
ऋचो हुत्वा प्रभूतैश्च दर्भैस्तरणमेव च ॥
आग्नेयाद्यः पशोः काले विकल्पेन विधीयते ।
एकादशाथयूपे वा कस्मिन्नपि लभ्यते ॥
एषा त्रैविद्यवृद्धेन तालवृन्तनिवासिना ।
सोमपेन कृता वृत्तिः प्रयोगस्य प्रदीपिका ॥

Colophon :

इत्यष्टमः पटलः ॥

इत्यापस्तम्बप्रयोगवृत्त्यां तालवृन्तनिवासिकृतायां प्रदीपिकायां साग्निचित्यः क्रतुः समाप्तः ॥

समाप्तः सप्तदशप्रश्नः हरिः ॐ । शुभमस्तु ॥

Subject : Āpastambaśrautasūtraprayogadīpikā—a Prayoga treatise based on the 16th & 17th Praśnas of Āpastambaśrautasūtras.

1 प्रथमचितिः 10 Paṭalas.

2 साग्निचित्यक्रतुः 8 Paṭalas.

Remarks:—The Ms. is in a fairly good condition. This Ms. contains the following works.

		Leaves.
1	आपस्तम्बश्रौतप्रयोगदीपिका (16th & 17th Praśnas)	1 - 53
2	आपस्तम्बशुल्बोपाधानकारिका	54 — 67
3	आपस्तम्बश्रौतप्रयोगदीपिका (18-22 Praśnas)	68 — 178 & 1 - 189
4	आपस्तम्बपौण्डरीककारिका	190 — 194

॥ आपस्तम्बश्रौतप्रयोगदीपिका ॥

2589. ĀPASTAMBAŚRAUTAPRAYOGA-DĪPIKĀ.

Burnell's Catalogue No. 9164 a. Page 18. Left column. Substance—Palm leaf. Size—17½ × 1½ inches. Leaves —28(1-28). Lines—8 to a Page. Script—Grantha. No. of Granthas—900. Author— Tālavṛntanivāsin. Sixteenth and Seventeenth Praśnas only.

Beginning, end, colophon and subject—Same as No. 2588.

Remarks: —The Ms. is in a fairly good condition. This Ms. contains the following works.

1. आपस्तम्बश्रौतप्रयोगदीपिका	Leaves
(16th & 17th Praśnas)	1 — 28
2. आपस्तम्बशुल्बोपधानकारिका	29 — 36
3. आपस्तम्बश्रौतप्रयोगदीपिका	,,
(18—22 Praśnas)	37 — 184
4. आपस्तम्बपौण्डरीककारिका	185 & 186.

॥ आपस्तम्बश्रौतप्रयोगदीपिका ॥

2590. ĀPASTAMBAŚRAUTAPRAYOGA-DĪPIKĀ.

Burnell's Catalogue No. 9139 c. Page 18. Left column. Substance—Palm leaf. Size—19¼ × 1¾ inches. Leaves—17. (201—217). Lines—8 or 10 to a Page. Script—Grantha. No. of Granthas—800. Author—Tālavṛntanivāsin. Sixteenth and Seventeenth Praśnas. Incomplete.

Beginning:

विवाजसे तृचा दाम्नाबद्धं विमुञ्चति "आपेहिष्ठामयो भुवः" इति तिसृभिरप उपसृज्य 'मित्रः संमृज्ये'ति द्वाभ्यां मर्मकपालादिनासंसर्गः । अमोंग्रामस्यण्डिलं तत्र यानि कपालानि शुचिभूतानि तेषां पिष्टैर्वैष्णवंगारपिष्टैर्व्रीहितुषैश्चाष्टाश्रिपक्षे एकैकस्यां दिशि द्वे द्वेऽभिचरत उदीच्यस्तिस्रः । "अदितिस्तेविलं रुक्षातु" इति बिलकरणं कृत्वायसामहीमुखामितिकरणदेशादुत्तरासिकासु स्थापयामीति मित्रैतान्त उखामिति मित्रायादित्याय . यागरक्षं प्रयच्छति उखां करोति ॥

End, colophon and subject—Same as No. 9162 a.

Remarks :—The Ms. is in a fairly good condition. For the other works contained in this Ms. see the list under Remarks on No. 2584.

॥ आपस्तम्बश्रौतप्रयोगदीपिका ॥

2591. ĀPASTAMBAŚRAUTAPRAYOGA-DĪPIKĀ.

J. L. Collection No. 257. Substanc—Paper. Size—9¾×4¾ inches. Sheets—127 (3—131; sheets 1, 2, 116 & 117 wanting). Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—3650. Author—Talāvṛntanivāsin. 16-19 Praśnas. Incomplete.

Beginning:

अप उपस्पृश्य । देवस्य त्वा । ज्योतिष्मंतंत्वेति द्वाभ्यां खननम् । अप उपस्पृश्य । अपां पृष्ठमसि प्रप्या इति पुष्करपर्णं पूर्वगृही(त)माददति पुनश्च अपां पृष्ठ-

मसीति विवेष्ट्य कोशीकृत्वा । शर्मे(र्म)चस्थः संवसाथामिति द्वाभ्यामुत्तरेण मृत्खननं कृष्णाजिनमास्तृणाति । उपरिष्टात्पुष्करपर्णकोशे(शमुत्तानं) यथास्याच्चथास्तृणोति पुरीष्योसि विश्वभराः । अग्ने इति मृत्खननस्वाभिमंत्रणम् । अभिहरणं मृदं पात्रे गृहीत्वा तूष्णीत्वमग्ने पुष्करादधीत्यारभ्य धनंजयꣳरणे रण इत्यन्ताभिः (त्रिभिः) कृष्णाजिने च पुष्करपर्णे च निर्वपति । यदा चतसृभिः पुरीष्योसीत्यारभ्य धनंजयꣳरणे रण इत्यंतैरेवेनमन्वपश्यन्तेनै(वै)नं संभरतीति लिंगात् ॥

End :

श्रैष्ठ्यमग्रचं(?)स उत्तरया इष्ट्या यक्ष्ये समानानामग्रत्व प्राप्त्यर्थम् । अनुषूकः सूनेषु व्रीहिषु मूलेभ्यः प्ररूढा अनुषूका ओत्रं तवेन् । तेभ्यो निर्वापः सेंद्रष्वरुतिर्वपा इन्द्राय जुष्टम् । बुध्नादग्रं बुध्नादग्रेणेति याज्यानुवाक्ये । ब्राह्मणस्याग्न्वकामिनः समाना वा बहिस्पत्य आनुषूकः ष्वरः इष्ट्या यक्ष्ये समानाभामग्रचमवाग्रवानिवहुस्य ? जुष्टं उक्ताः प्रयोजके महाबुध्नायैाग्रमिति तिसृणामुत्तरा विकृत्यर्थापः पापपक्षगृहीतः स उत्तरया इष्ट्या यक्ष्य रोगशान्त्यर्थं आदित्योन्योजुष्टे निर्वपामि उत्ताग्नयोनवोपवादित्या अमावास्यायामेव यागः अमावास्यान्तां । आदित्यादेवता अन्नाद्यकाम...

Colophon : (Sheet No. 40).

एषा वैविद्यवृद्धेन + प्रयोगस्य प्रदीपिका ॥

इत्यापस्तम्बसूत्रप्रयोगवृत्यां तालवृन्तनिवासिकृतायां

नाग्निचित्यः समाप्तः ॥

Subject : Āpastambaśrautaprayogadīpikā 16—19 Praśnas.

Remarks :—The Ms. is in a decaying condition. This Ms. abruptly begins in the middle of the 1st Paṭala of the 16th Praśna and breaks off towards the close of the 19th Praśna. This Ms. is full of scriptorial blunders.

॥ आपस्तम्बश्रौतप्रयोगदीपिका ॥

2592. ĀPASTAMBAŚRAUTAPRAYOGA-DĪPIKĀ.

Burnell's Catalogue No. 9162 c. Page 18. Left column. Substance—Palm leaf. Size—16⅛×1¼ inches. Leaves—301 (68-178; 1-189). Lines—6 to to a Page. Script—Grantha. No. of Granthas—5600. Author—Tālavṛnta-nivāsin. 18-22. Praśnas.

Beginning:

कपर्द्यभिप्रायेण वाजपेयमारभ्य विश्वसृजामयनपर्यन्तानां कर्मणां प्रयोग उच्यते । वाजपेयो द्विप्रकारः । आप्तवाजपेयः कुरुवाजपेयश्च । अस्मिन् कृतौ नाग्निचयनम् प्रतिषेधात्परिभाषायाम् । केचिदत्रापि छन्दोगमताच्चु चयनं कार्यमिति । ज्योतिष्टोमस्य संस्थाभूतोऽपि वाजपेयोऽस्तीति छन्दोगोक्तम् । आपस्तम्बेन क्रत्वन्तरत्वेन वाजपेय उक्तः । क्रत्वन्तरवाजपेयस्य द्विप्रकारत्वमुक्तम् । अस्य वाजपेयस्य प्रथममुच्यते । सप्तदशदीक्षापक्षे शरदि दशम्यामुपक्रमः । त्रयोदशदीक्षापक्षे चतुर्दश्यामुपक्रमः । पर्वणोः सुत्या भवति प्रातराग्निहोत्रं हुत्वा आप्तेन वाजपेयेन यक्ष्ये ॥

End:

व्याघ्रो वैयाघ्र इत्यादि हीनमभिमन्त्रयते पुरोहितः। अथोनन्तोत्मावस्ताभिर्दूर्वास्ताभिर्वाग्मिराजानमभिषिञ्चति पुरोहितः "वा दिवा" इत्यारभ्य "वाक्तेन छन्दसा" इत्येतैर्मन्त्रैररुणत्वावृकमित्येनमभिमन्त्र्य प्रवाहति वा प्रसस्येन्द्रस्यते वीर्य इत्युपावहरन्ति। अग्रेणाग्निं रथोऽवस्थितो भवति। अभिप्रेहीति तं राधाभ्यैतिष्ठ वतहंनम(?) इति हारोहन्तमभिमन्त्रयते। अङ्कौ न्यङ्काविति रथचक्राभिमृशति पक्षसि वा। "आतिष्ट वृत्रहन्" इति षड्भिरारूढं "परिमासेन्या" इति द्वे वाचयित्वा उत्तराभिस्तिसृभिरभिमन्त्र्य उदवसायेत्वित्यादित्यमुपदीक्षते अन्नयामिति जनपदान् सान्तिष्ठते राजाभिषेकः सन्तिष्ठते सवः ॥

Colophon:

स वाः ॥ तत्र श्लोकः ॥

एषात्रैविद्यवृद्धेन तालवृन्तनिवासिना।

\+ प्रयोगस्य प्रदीपिका ॥

इत्यापस्तम्बसूत्रप्रयोगवृत्त्यां **तालवृन्तनिवासि**कृतायां **प्रदीपिकायां** सवाः समाप्ताः ॥

हरिः ॐ अविघ्नमस्तु। शुभमस्तु ॥

Subject: Āpastambaśrautasūtraprayogadīpikā. 18-22 Praśnas. This Ms. deals with the following important topics:—

Subject.	Praśna.	Paṭala.	Leaves.
वाजपेयम्	XVIII	1—3	68—90
(a) आप्तवाजपेयम्	,,	,,	68—83
(b) कृतवाजपेयम्	,,	,,	83—90

Subject.	Praśna.	Paṭala.	Leaves.
राजसूयम्	XVIII	4—8	90—109
सौत्रामणी	XIX		109—121
कौकिली	,,		121—130
काठकाः	,,		130—153
(a) सावित्रचयनम्	,,		130—135
(b) नाचिकेतचयनम्	,,		135—138
(c) चातुर्होत्रम्	,,		138—139
(d) वैश्वसृजचयनम्	,,		139—141
(e) आरुणकेतुकः (पञ्चमः काठकः)	,,		141—153
दिवश्श्येनयः	,,		153
काम्यपशुबन्धाः			153—171
काम्येष्टयः		171—178 & 1—29	
अश्वमेधः	XX	1—6	29—55
पुरुषमेधः	,,	,,	55—62
द्वादशाहः	XXI	1—4	63—88
(a) 1 समूढसत्रम्	,,	,,	88
2 काठकाग्नियुतसत्रम्	,,	,,	84
(b) अहीनम्	,,	,,	84—86
1 व्यूढद्वादशाहः	,,	,,	86—88
2 भरतद्वादशाहः	,,	,,	88
गवामयनम्	,,	5	88—94
महाव्रतम्	,,	6 & 7	93—99
उत्सर्गिणामयनम्	,,	?	99—101

Subject.	Praśna.	Paṭala.	Leaves.
एकाहः	XXII	?	101—159(?)
विश्वजिदग्निष्टोमः	,,	?	103
इन्द्रस्याभिदग्निष्टोमः	,,	?	104
चत्वारः साहस्राः	,,	?	105
विश्वजिच्छिल्पम्	,,	?	112
श्येनयागः	,,	?	,,
त्रयो वाचस्तोमानि	,,	?	114
व्रात्यस्तोमः	,,	2	115
नाकसदसः पञ्च	,,	3	118
त्रिवृत्स्थाग्निष्टुत्	,,	,,	119
बृहस्पतिसवः	,,	,,	120
सर्वस्वारः	,,	,,	123
चातुर्मास्यम्	,,	,,	123—134
(a) वैश्वदेवम्	,,	,,	123—126
(b) वरुणप्रघासः	,,	,,	126—130
(c) साकमेधः	,,	,,	130—133
(d) शुनासीरीयः	,,	,,	133—134
उपहव्यम्	,,	,,	134
ऋतपेयम्	,,	,,	135
इन्द्रस्तोमः	,,	,,	137
अग्निष्टुत्	,,	,,	138
तीव्रसुत	,,	,,	138
पुनस्तोमः	,,	4	140

Subject.	Praśna.	Paṭala.	Leaves.
सर्वतोमुखम्	XXII	4	141
उद्भिद्बलभित	,,	,,	154
अपचितिः	,,	4	155
पक्षिसाग्निचित्यम्	,,	,,	,,
कुलायः	,,	,,	157
त्रिवृत्तिरात्रः	,,	,,	158
षोडशिकल्पिः	,,	,,	159—160
अहीनाः	,,	,,	160—189
व्युष्टिद्विरात्रः	,,	5	160
गर्गद्विरात्रः	,,	,,	161
वैदत्रिरात्रः	,,	6	167
वसिष्ठचतूरात्रः	,,	,,	169
पञ्चपञ्चाहः	,,	,,	,,
चत्वारः षडहाः	,,	7	173
अष्टौ सप्तरात्राः	,,	,,	177
अष्ट रात्राः	,,	,,	180
शललीपिशङ्गः	,,	7	181
चत्वारो दशरात्राः	,,	,,	,,
पौण्डरीकैकादशरात्राः	,,	,,	184
ग्रहकल्पिः	,,	,,	,,
सवानां कर्म	,,	8	185—189
वैश्यसवः	,,	,,	185
ब्राह्मणस्वं द्वितीयाग्नेयादि	,,	,,	,,

Subject	Praśna	Paṭala.	Leaves.
सोमस्वः	XXII	8	186
राजाभिषेककर्म	,,	,,	188 to 189

Remarks:—The Ms. is in good condition. For the other works contained in this Ms. see the list under Remarks on No. 2588.

॥ आपस्तम्बश्रौतप्रयोगदीपिका ॥

2593. ĀPASTAMBAŚRAUTAPRAYOGA-DĪPIKĀ.

Burnell's Catalogue No. 9164 c. Page 18. Left column. Substance—Palm leaf. Size—17¼×1½ inches. Leaves—148 (37—184). Lines—8 to a Page. Script—Grantha. No. of Granthas—5600. Author-Tālavṛntanivāsin. 18-22 Praśnas.

Beginning, end, colophon and subject—Same as No.

Remarks:—The Ms. is in a fairly good condition. For the other works contained herein see the Remarks under No. 2589.

॥ आपस्तम्बश्रौतप्रयोगदीपिका ॥

2594. ĀPASTAMBAŚRAUTAPRAYOGA-DĪPIKĀ.

Burnell's Catalogue No. 9139 f. Page 13. Left column. Substance—Palm leaf. Size—19¼×1¼ inches. Leaves—5 (272—276). Lines—8 to a Page. Script—Grantha. No. of Granthas—250. Author—Tālavṛntanivāsin. Eighteenth Praśna only (Incomplete).

Beginning—Same as No. 9162 c.

End:

यजमानः पत्न्याप्यारोहणावरोहणेऽग्रेण यूपं वस्ताजिनं

प्राचीनग्रीवमुत्तरलोमास्तीर्य तस्मिञ्छतमानं हिरण्यं निद-
धात्यध्वर्युः "अमृतमसि" इति यजमानः हिरण्ये दक्षिणां
पादमवदधाति । "पुष्टिरसि प्रजननमसि" इति वस्ताजिने
सव्यं तस्माच्चर्मणो भूमिं स्पृशन् आसन्दी दक्षिणायतां
प्रागायतां रोहति दिवं प्रोष्ठनीमित्यारोहन्तं यजमानमभि-
मन्त्रयतेऽध्वर्युः सप्तभिः पूर्वमन्त्रैः प्रयाज्याश्चौषधीः(?)
संसृज्य समवदाय वार्धेस्यमिति मन्त्रैः ॥

Subject : Āpastambaprayogadīpikā, based on the 18th Praśna of the Āpastambaśrautasūtra of the Black Yajur Veda.

Remarks :— The Ms. is in a fairly good condition. For the other works contained herein see Remarks under No. 2584.

॥ आपस्तम्बश्रौतप्रयोगदीपिका ॥

2595. ĀPASTAMBAŚRAUTAPRAYOGA-DĪPIKĀ.

Burnell's Catalogue No. 9139 d. Page 18. Left column Substance—Paper. Size —19¼ × 1¾ inches. Leaves-40 (218-257). Lines—8 to 10 to a Page. Script—Grantha. No. of Granthas—2000. Author—Tālavṛntanivāsin. 19th Praśna only.

Beginning :

सौत्रामण्याः कर्मोच्यते । नवम्यां सौत्रामण्या यक्ष्य
इत्युक्त्वा "विद्युदसि" "पङ्क्तोता"। पशुवत् सीसेन क्लीवाच्छ-
ष्माणि क्रीणाति सीसम् கயம் शुष्काणि विरूढयवा व्रीहयो
वा क्षौमे वाससि बध्वा स्थाप्यते त्रिरात्रं यथा न शुष्काणि
भवन्ति तथोपायः क्रियते । पङ्क्तोऽग्निः परित्यज्यतेऽन्य-

स्मिन्नाग्निहोत्रहोमः । ततो द्वादश्यां प्रातरग्निहोत्रं हुत्वा सुरेष्ट्यर्थमग्निः प्रणीयते । न "विद्युदसि" । ततोऽग्न्यन्वाधानम् ॥

End :

इन्दुरासिरीये वायो शुनासीर्यस्योक्ते सूत्रकारेण "तरणिर्दिवो रुक्मः" "चित्रं देवानाम्" इति वा सौर्यस्य ॥ तत्र श्लोकाः ॥

शत[क्षत]कृष्णलया यक्ष्ये भक्षणं तु विधीयते ।
आज्ये प्रथाज्येष्वन्नोष्य कृष्णलैः सह भूयते ॥

❀ ❀ ❀ ❀

उत्करे वेदिधर्माः स्युर्वर्षाहस्तु पुनर्नव ।
सवकारीरनामस्याद्यक्षेत्रैधानवी यया ॥
तथा यवमयो मध्ये दाम्नो राजन्य एव च ।
वैश्वानरी च प्रोक्ता(?) सौवर्णं दाम दक्षिणा ॥

Colophon :

एषा त्रैविद्यवृद्धेन तालवृन्तनिवासिना ।
कौशिकेन कृता वृत्तिः प्रयोगस्य प्रदीपिका ॥

हरिः ॐ । शुभमस्तु ॥

Subject : Āpastambaśrautaprayogadīpikā based on the 19th Praśna of the Āpastambaśrautasūtras of the Black Yajurveda.

This Ms. contains the following important sections:—

Subject	Praśna	Leaf
सौत्रामणी	XIX	218—221
मैत्रावारुणी	,,	221
कौकिली	,,	221—225

काम्याः XIX 225—257

(a) सावित्रचयनम् 225—227

(b) नाचिकेतचयनम् 227

(c) चातुर्होत्रम् 227—228

(d) वैश्वसृजचयनम् 228

(e) आरुणकेतुकः (पञ्चमः काठकः) 229—234

दिवःश्येनी 234—235

अवाधाः 235—236

काम्यपशुबन्धाः 236—241

काम्येष्टयः 241—257

Remarks:—The Ms. is in a fairly good condition. For the other works contained in this Ms. see the list under Remarks on No. 2584.

॥ आपस्तम्बश्रौतप्रयोगदीपिका ॥

2596. ĀPASTAMBAŚRAUTAPRAYOGA-DĪPIKĀ.

Burnell's Catalogue No. 9172 a. Page 25. Right column. Substance—Palm leaf. Size—16 × 1½ inches. Leaves—52 (1-42 and 63 to 72 out of 144). Lines—8 to a Page. Script-Grantha. No. of Granthas—2000. Author—Tālavṛntanivāsin. 19th Praśna only.

Beginning, end, colophon and subject—Same as No. 2595.

Remarks:—The Ms. is in decaying condition. For the other works contained in this Ms. see the list under Remarks on No. 2057.

॥ आपस्तम्बश्रौतप्रयोगदीपिका ॥

2597. ĀPASTAMBAŚRAUTAPRAYOGA-DĪPIKĀ.

Burnell's Catalogue No. 9139e. Page 18. Left column. Substance—Palm leaf. Size—19¼ × 1¾ inches. Leaves—14 (258—271). Lines—8 to 10 to a Page. Script—Grantha. No. of Granthas—650. Author—Tālavṛntanivāsin ? Twenty-first Praśna only.

Beginning:

द्वादशाहस्य प्रयोग उच्यते । स तु द्विप्रकारः । सत्रभूतोऽहीनभूतश्च । तत्र सत्रभूतो द्विप्रकारः । व्यूढसमूढतया । अहीनभूतोऽपि तथैव । चित्योऽग्निर्नियतः काठको वा । तत्र महाग्निपक्षमाश्रित्य सूत्रभूतप्रयोगं सप्तदशावराध्याः पुरुषाः शिशिरे एकाष्टायामिष्टप्रथमयज्ञाः स्वाग्नीन् समारोप्य एकत्र त्वा साग्निसन्निधौ सर्वे द्वादशाहेन सत्रभूतेन साग्निचित्येन यक्ष्यामहे प्रजायेमहीति सङ्कल्पः । स्वर्गोऽपि फलम् । विद्युत् । न सोमप्रवाकवरणम् । नर्त्विग्वरणम् । अन्योन्यन्त्वस्माकं गृहपतित्वं ब्रह्मेति पारस्परदीक्षाक्रमेण परस्परं विज्ञापयन्ति । ततो देवयजनयाच्ञा देवतोपस्थानं वा तत्र द्रव्यसंसर्गमसाधारणद्रव्येण गृहपतिर्नान्दीश्राद्धं करोति ।

End:

यां कृत्वा पुनश्चोखासंभरणं कृत्वा सौत्रामणीमैत्रावरुणी च त्र्यनीकाग्राह्यपक्षे एकोदशिन्य(?) उगत्सर्गिणमययेन वा पवमाना भवेयुः तस्योत्सर्गप्राप्तिः तस्यामह्नः प्राप्तानाप-

श्रुतिग्राह्याणान्त्याभ एव उत्सृष्टानां पुनराहारणे च उत्सर्गो यत्पापादि प्राप्तुं तथेहायुष्या सन्तत्यत्र पश्वर्थं वा नरक-पातकनिङ्गत्तिर्वा । एवं गुणविकृतस्य फलम् ।

Colophon :

उत्सर्गिणामयनं समाप्तम् ॥ हरिः ॐ ॥

द्वादशाहप्रयोगः समाप्तः ॥

Subject : Āpastambaśrautaprayogadīpikā based on the 21st Praśna of the Āpastambaśrautasūtras of the Black Yajurveda.

This Ms. deals with the following important topics:—

Subject	Praśna	Leaf.
द्वादशाहः	XXI	258—265
सत्रात्मकः समूढः	,,	265—268
गवामयनम्	,,	268
गो आयुषी	,,	269
व्यूढद्वादशाहप्रयोगः	,,	,,
उत्सर्गिणामयनम्	,,	270 & 271

Remarks :—The Ms. is in a fairly good condition. For the other works contained in this Ms. see the list under Remarks on No. 2584.

॥ आपस्तम्बश्रौतप्रयोगदीपिका ॥

2598. ĀPASTAMBAŚRAUTAPRAYOGA-DĪPIKĀ.

Burnell's Catalogue No. 9172 (i). Page 25. Right column. Substance—Palm leaf. Size—16 × 1½ inches. Leaves—7

(80—86). Lines—8 to a Page. Script—Grantha. No. of Granthas—180. Author—Tālavṛntanivāsin. Sarvatomukha only.

Beginning:

सर्वतोमुखम् ॥ सर्वतो(मुखेन) यः कामयेत सर्वमिदं भवेयमिति अहमेव सर्वस्येश्वरो भूयासमिति यः कामयेत स सर्वतोमुखेन यजेत। मोक्षार्थमेतत्कर्म। मध्ये गार्हपत्यः प्रतिदिशं सौमिका विहाराः दक्षिणाग्निशालामुखीयाद्याः। दक्षिणहस्तसमीपे दक्षिणाग्निकल्पनम्। सर्वत्र देशभेदादृत्विग्भे(दः स्तोत्र)दात् शास्त्रभेदाच्च तृवृत्। प्राच्यां दिशि पञ्चदशो दक्षिणतः सप्तदश पश्चादेकविंश उत्तरतः। षोडशिकानि(षडाहिका)न्ये तान्यहानि द्वादशाहीयदशरात्रिकाणि। तस्मात् द्वादशाहधर्मा अ[न]हीनधर्माश्च प्रवर्तन्ते। द्वादशाहवद्दीक्षाकालः ॥

End:

पूर्वस्मिन्नेव केचित्प्रतिविहारमिच्छन्ति "इन्द्रेण सयुजो वयम्" इत्यावर्तते अवभृथादि सर्वत्राप्सु प्रचारः। मन्त्रेण एकस्मिन् सोमोष्णीषादि परिधानान्तम्। "अपाम सोमम्" इत्यादि तन्त्रेण समिदाधानं(नान्तं)उपस्थानञ्च भेदेन। उदयनीयादि सर्वत्रानुवन्ध्यावपाहोमान्तं पयस्याहोमान्तं वा कृते। प्रति होमपात्नीवता उत्तरविहारस्यैव केचित्। अयं व इत्येकं प्रतिविहारं वेद(देव)मुपस्थ आधायेत्यादि ब्राह्मणतर्पणान्तमुत्तरस्मिन् विहारे केचित् पूर्वस्मिन्निति उपोषण(ादिपृष्ठ्यन्तं)सर्वत्र स्वसिद्धान्तः (अथ) प्रजाहितं समारोप्येत्यादि इदमूनित्यध्यवसायमध्ये (गार्हपत्य इत्या-

दित्रि)धिना दार्शिकत्रेदिचतुष्टयम(ग्न्य)न्त्राधनादि उदव-सानीया प्रतिविहारं पूर्णाहुतिर्वा । के(चिदेकमेव) विहारं कुर्वन्ति । अस्मिन्नुदवसानीया पूर्णाहुतिर्वा प्रतिदिशं सौमिकविहारमिति वचनात् ॥

Colophon:

समाप्तः सर्वतोमुखः ॥

Subject: Āpastambaśrautaprayogavṛtti (Sarvatomukhaprayoga only) based on the 22nd Praśna of the Āpastambaśrautasūtras.

Remarks:—The Ms. is in decaying condition. For the other works contained herein see the Remarks under No. 2057. After the colophon the following is given:—" अनन्तरे पर्वणि सौत्रामणी ते मैत्रावरुणीतपशु.... द्वादशाहे प्रायणीये ·प्रातरनुवाकात्पुरस्तादग्निं युनज्मीति तिसृभिरग्निमभिमृशति+इन्द्राय त्वा विश्वेदेव्यावते । वायुरसि । एवं व्यतिषङ्गः

द्विपदान्तँ हरेत्स्पष्टं प्रस्तारे पञ्चमे ततम् ।
विशेषं तत्र वक्ष्यामो द्विसाहस्र..... ॥"

॥ यज्ञतन्त्रसुधानिधिः ॥

2599. YAJÑATANTRASUDHĀNIDHIḤ.

Burnell's Catalogue No. 3683. Page 23. Right column. Substance—Paper. Size—11¼×4¾ inches. Sheets—39. Lines—13 to 15 to a Page. Script—Devanāgarī. No. of Granthas—1350. Author—Sāyaṇācārya. Ādhāna only.

Beginning:

श्रीगणेशाय नमः ॥ श्री अरुणाद्रीश्वराय नमः ॥

वागीशाद्यास्सुमनसस्सर्वार्थानामुपक्रमे ।
यन्नत्वा कृतकृत्यास्स्युस्तन्नमामि गजाननम् ॥ १ ॥

सत्सूत्रान्वितशाश्वतागममहारत्नं विधानं गिरां
प्रत्यक्चित्तमुपास्महे वयममी बोधाय बौधायनम् ।
यद्वाङ्नावमवन्ध्यबन्धमहतीं प्राप्याध्वराम्भोनिधेः
पारं यान्ति मनीषिणो बहुविधैस्तन्त्रस्यतस्योर्मिभिः ॥२॥

सूर्याचन्द्रमसौ प्रकाशवपुषावास्तां जगच्चक्षुषी
ताभ्यामन्वययोर्द्वयं समुदभूत्तत्राविराभूद्यदुः ।
वंशे चन्द्रमसे तदन्वयनिधिः श्रीसं(सं)भोभून्नृप
तस्मात्प्रादुरभूदभीष्टसुरभिश्रीबुक्कपृथ्वीपतिः ॥ ३ ॥

हरिहरनिभभूमा कामदोभूज्जगत्यां
हरिहरनरपालस्तस्य भूष्णुस्तनूजः ।
परिणयति धरित्री यस्य कीर्तिप्रताप-
प्रभवत परिणाहैर्व्यक्तनक्तन्दिनश्रीः ॥ ४ ॥

मण्डले च कृपाणस्य मण्डलाग्रे च तीक्ष्णताम् ।
विदुषाङ्कम्पयन्भाति विद्विषाञ्च शिरांसि यः ॥

समधिकविभ(व)श्रीस्सत्क्रियाभिर्द्विजानां
हरिहरनरपालः कस्य न स्यात्प्रशस्यम् (यः) ।
अवितथगतिभिर्यद्दानधारासरिद्भि-
र्नवनवपरिणेता वर्धते सिन्धुराजः ॥ ६ ॥

तस्याभूदन्वयगुरुस्तत्त्वसिद्धान्तदर्शिनः ।
सर्वज्ञः सायणाचार्यो(र्यो) मायणार्यतनूद्भवः ॥ ७ ॥

उपेन्द्रस्येव यस्यासीदिन्द्रस्तुमनसाम्प्रियः ।
महाक्रतूनामाहर्ता माधवार्यसहोदरः ॥ ८ ॥

यस्य निश्वसितं श्रुतीर्बहुविधा व्यासावतार(ः) स्वयं
व्यासोक्ताः पुनरध्वरश्रुतफला बौधायनात्मा व्यधात् ।
कल्पाध्वक्रयतः प्रयोगसुलभांस्तान्विप्रकीर्णान्बहू-
नेकीकृत्यमयं हरिस्समजनि श्रीसायणार्यः क्षितौ ॥ ९ ॥

ससत्कुर्वन् महादानान्यामनायोक्तान्यनुक्रमात् ।
तुलापुरुषदानेन भूसुरान्समतोषयत् ॥ १० ॥

तस्मिन्महोत्सवे सन्तः प्रशंसन्तस्तदद्भुतम् ।
उपासत तदैकात्म्यादुन्नतश्रीपरिच्छदाः ॥ ११ ॥

स तैः प्रकाशितो यान्तःप्रकाशात्मा व्यरोचत ।
प्रभाकरस्तुलारूढः प्रांशुर्ज्योतिर्गणैरिव ॥ १२ ॥

ते तपस्तेजसां राशिमासीनं परमासने ।
सर्वज्ञं सायणाचार्यं पर्यपृच्छन्सभासदः ॥ १३ ॥

अधीतास्सकला वेदास्ते च दृष्टार्थगौरवाः ।
तत्प्रणीतेन तद्भाष्यप्रदीपेन प्रथीयसा ॥ १४ ॥

वेदास्सर्वेपि यज्ञार्थास्तत्प्रयोगान्सविस्तरान् ।
प्र(प्रा)णैषीदात्मकल्पेन महाबौधाय्यनो मुनिः ॥ १५ ॥

स पुनर्विप्रकीर्णत्वाद्बहनत्वाच्च देशिक ।
न स्थूलबुद्धिभिः शक्यमस्माभिरवगाहितुम् ॥ १६ ॥

आध्वर्यवेण हौत्रेण तथौद्गात्रेण वा विना ।
न निर्वहन्ति कात्स्न्र्येन वैदिक्यो निखिलाः क्रियाः ॥

पूर्वे तु ग्रन्थकर्तारो ह्येकैकत्र कृतश्रमाः ।
तत्रापि कात्स्न्र्यतो वक्तुमेव यत्नं समाश्रिताः ॥ १८ ॥
तदद्य बहुसन्देहनिवृत्तिकरणक्षमम् ।
विधेहि कृपयास्माकं यज्ञतन्त्रसुधानिधिम् ।
तेषान्तद्वचनं श्रुत्वा सायणार्यः कृपानिधिः ॥ १९ ॥
त्रयीसूत्राणिसंवीक्ष्य तान्निबन्धांश्च कृत्स्नशः ।
संगृह्य सारं कृतवान्यज्ञतन्त्रसुधानिधिम् ॥ २० ॥

अग्निनाधास्यमानस्सर्वदुरितापूर्वपापक्षयकामस्सर्वप्रायश्चित्तरूपं कूश्माण्डहोमं कुर्यात् । तस्यामावास्यायां पौर्णमास्यां वोपक्रमः । तस्यायं प्रयोगक्रमः । एनोनिबर्हणार्थं कूश्माण्डैर्होष्यामीति सङ्कल्प्य श्मश्रूपपक्षकेशलोमनखानि वापयित्वा स्नानाद्यनन्तरन्देवतादिसङ्कल्पङ्कुर्यात् । पुण्याहे देवताग्न्यादयः । प्रधानदेवता सविता । चरुर्हविः । आघारन्तन्त्रम् । तं देवयजनोल्लेखनाद्यग्निमुखान्तं कृत्वा "भूर्भुवस्सुवरोम्" इत्यनुद्रुत्य "तत्सवितुर्वरेण्यम्" इत्येतया पक्वं हुत्वा स्विष्टकृतमवदाय अन्तःपरिधि सादयित्वाज्याहुतीरुपजुहोति ॥

End :

अथवा आधानोक्तामाग्नेयेष्टिं कृत्वा अग्न्याधेयदक्षिणान्दत्वा आग्नेयमष्टाकपालम्पुनराधानोक्तङ्कृत्वा पुनराधानोक्तदक्षिणां दद्यात् । इन्द्राग्न्यादिति देवतानिष्टिं कृत्वा द्वादशाहव्रतचर्यान्ते अग्नये पवमानायेष्टिः अग्नये पावकाय अग्नये शुचयेष्टिः । आग्निवारुणीष्टिरनन्तरमिति केचित् । पुनराधानानन्तरं संवत्सरात्पूर्वं पुत्रमरणादिनिमित्ते

पुनरपि पुनराधानं कुर्यात् । तस्मिन् तृतीया आधाने पञ्च-कपालस्याग्नेयस्य स्विष्टकृदवदानानन्तरं स्रुवाहुतीरुपजुहोति लेकः सलेकः सुलेकस्तेन आदित्या आज्यं जुषाणाविय तु स्वाहा ॥ आदित्येभ्य इदम् ॥ विवस्वाꣳ आदितिर्देवजूतिस्तेन आदित्या आज्यं जुषाणावियन्तु स्वाहा ॥ आदित्येभ्य इदम् ब्राह्मणतर्पणान्तं समानम् ॥ अथ सर्वाग्निनाशे समारूढारणीनाशे च अग्नीनाधास्ये ॥ विच्छिन्नसन्धानार्थमिति सङ्कल्प्य ॥ ऋत्विग्वरणादिगोपितृयज्ञवर्जमविकृतमग्न्याधेयङ्कुर्यात् ॥

Colophon :

इति श्रीयज्ञतन्त्रसुधानिधौ पुनराधानप्रकरणं समाप्तम् ॥ श्रीः श्रीः ॥

(Sheet 35)

इति श्रीमद्राजाधिराजपरमेश्वरवीरहरिहरसकलसाम्राज्यधुरंधरवैदिकमार्गस्थापनाचार्यस्य श्रीसायणाचार्यस्य कृतौ यज्ञतन्त्रसुधानिधावाधानप्रकरणं सम्पूर्णम् ॥

Subject: Yajñatantrasudhānidhi—a popular śrauta prayoga treatise based on the Bodhāyanaśrautasūtras of the Black Yajur Veda. This Ms. contains the Ādhāna portion only.

Remarks:—The Ms. is in good condition.

॥ यज्ञतन्त्रसुधानिधिः ॥

2600. YAJÑATANTRASUDHĀNIDHIḤ.

J. L. Collection No. 258. Substance—Paper. Size—$9\frac{7}{8} \times 4\frac{1}{4}$

inches. Sheets—65. Lines—9 to a page. Script—Devanāgarī. No. of Granthas—1300. Author—Sāyaṇācārya. Ādhāna only.

Beginning, end, colophon and subject—Same as No. 3683.

Remarks: —The Ms. is in a decaying condition.

॥ यज्ञतन्त्रसुधानिधिः ॥

2601. YAJÑATANTRASUDHĀNIDHIH.

Burnell's Catalogue No. 3956. Page 24. Left column. Substance—Paper. Size—$9\frac{1}{4} \times 4\frac{1}{4}$ inches. Sheets—65. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—1300. Author—Sāyaṇācārya. Cāturmāsya only.

Beginning :

श्रीगणेशाय नमः ॥

अथ चातुर्मास्यान्युच्यन्ते । चातुर्मास्यानीति कर्मसमुदायनाम । तस्य चतुर्धा प्रयोगः । यावज्जीवः सांवत्सरिको द्वादशाहा यथाप्रयोगश्चेति । यथाप्रयोग इति प्रयोगपर्याप्तः कालः । एषु पूर्व[ ]पूर्व(ः)श्रेयान् । अत्र यावज्जीवसांवत्सरिकयोर्वैश्वदेववरुणप्रघाससाकमेधशुनासीर्याणां यथाक्रमं फाल्गुन्याषाढीकार्तिकीफाल्गुनीपौर्णमासीषु प्रयोगः । चैत्री श्रावणी मार्गशीर्षीषु तिसृषु वा । पक्षद्वयेऽपि पर्वणोरन्तराले वा व्रतचर्या । यावज्जीवपक्षे द्वितीयादिवर्षेषु वैश्वदेवयागः । प्रतिपदि प्रथमवैश्वदेवयागोऽपि । प्रातिपदि यावज्जीवप्रयोगे प्रथमसंवत्सरे व्रतचर्या । अत ऊर्ध्वं दर्शपूर्णमासिकमेव व्रतम् । द्वादशाहप्रयोगे तूदगयन आपू-

र्यमाणपक्षे पुण्यनक्षत्रे आरम्भः । समाप्तिरपि पूर्वपक्ष एव । समाप्तिरपरपक्ष इति केचित् ॥

End:

संस्थितामिष्टैः वैश्वदेववरुणप्रघाससाकमेधशुनासीर्यासंबन्धिनां यथाक्रमं विश्वदेववरुणेन्द्रशुनासीर्याणामपि हविषामुपांशुत्वं केचिदिच्छन्ति ॥ समाप्तानि चातुर्मास्यानि ॥ अनन्तरमेतदङ्गत्वसोमो विहितः । तदशक्तस्य पुनः पशुश्चातुर्मास्यानि । तत्राप्यशक्तस्य सवनेष्टिः । तत्र सोमस्य प्रयोगः उत्तरत्र वक्ष्यते । पशोश्चातुर्मास्यानाञ्चोक्त एव प्रयोगः । सवनेष्ट्यां तु अग्निरिन्द्रो विश्वेदेवा इति तिस्रो देवताः । पौर्णमासवत्तन्त्रम् । प्रधानस्याग्निः । अग्निर्मूर्धा भुवोजस्येति इन्द्रस्य एन्द्रसानसिꣳरयिं प्रससाहिषे पुरुहूतः विश्वेषां देवानां विश्वेदेवास आगत ये के च ज्मा इति याज्यानुवाक्या । प्रकृतिवदितरत् ॥

Colophon:

इति श्रीमद्राजाधिराजपरमेश्वरहरिहरमहाराजसकलसाम्राज्यधुरंधरस्य वैदिकमार्गस्थापनाचार्यस्य सायणाचार्यकृतौ यज्ञतन्त्रसुधानिधौ आश्वलायनोक्तचातुर्मास्यहौत्रप्रकरणं समाप्तम् ॥ ग्रन्थसंख्या ११०० ॥

Subject: Yajñatantrasudhānidhi—Cāturmāsyaprayoga only based on the Sixth (fifth) Praśna of Bodhāyana sūtras.

1	वैश्वदेवः	Sheet	3
2	वरुणप्रघासः	,,	11
a	अवभृथः	,,	23

3 सार्कमेधः	Sheet	27
a महापितृयज्ञः	,,	47
4 शुनासीरीयम्	,,	49
a आदित्येष्टिः	,,	63

Remarks :—The Ms. is in good condition.

॥ यज्ञतन्त्रसुधानिधिः ॥

2602. YAJÑATANTRASUDHĀNIDHIḤ.

J. L. Collection No. 259. Substance—Paper. Size—$9\frac{3}{4} \times 4\frac{3}{8}$ inches. Sheets—47. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—1300. Author—Sāyaṇa. Cāturmāsya only.

Beginning, end, colophon and subject—Same as No. 3956.

Remarks :—The Ms. is in good condition.

॥ यज्ञतन्त्रसुधानिधिः ॥

2603. YAJÑATANTRASUDHĀNIDHIḤ.

Burnell's Catalogue No. 4150. Page 25. Left column. Substance—Paper. Size—$11\frac{3}{4} \times 5\frac{1}{8}$ inches. Sheets—43. Lines—11 or 12 to a Page. Script—Devanāgarī. No. of Granthas—1000. Author—Sāyaṇācārya. Agniṣṭoma only.

Beginning :

श्रीगणेशाय नमः ॥

अथोद्गातृप्रयोगः ।

ऋत्विगार्षेयोनूचान इत्याद्युक्तलक्षणवानृत्विग्भवति ।

यज्ञशर्मा ज्योतिष्टोमेनाग्निष्टोमसंस्थेन रथन्तरपृष्ठेन द्वादशशतगवदक्षिणेन सोमेन यियक्षतो तत्रौद्गात्रं भवता कर्तव्यमिति सोमप्रवाकेनाभ्यर्थितः ज्योतिष्टोमेनाग्निष्टोमेन रथन्तरपृष्ठेन द्वादशशतदक्षिणेनाहं यक्ष्ये, तत्र 'मे त्वमुद्गाता भव'इति वा यजमानेन प्रार्थितः उद्गाता यद्यार्त्विज्यं न करिष्यन् स्यात्तदा "नमः सोमाय राज्ञे" इत्युक्त्वा प्रत्याख्यानं कुर्यात्, 'न करिष्यामि'ति यद्यार्त्विज्यं चिकीर्षति तदानीं सोमप्रवाकं यजमानं वा प्रतिपन्नयेत्। "महन्मेवोचो भगो मे वोचो यशो मे वोचस्तोमं मे वोचो भुक्तिम्मे वोचस्सर्वं मे वोचस्तन्मावतु तन्माविशतु तेन भुक्षिषीय"इति।

End:

प्रस्तोता अनूबन्ध्या च वपायागकाले क ईः वं वेदेति वाशं साम त्रिर्गायेत्। उदवसानीये प्रस्तोता प्रधानयागकाले गायन्तित्वेत्युद्वंशीयं साम तृचे गायेत्। ऋषिरुद्वंशीयः। अनुष्टुप् छन्दः। इन्द्रो दे०। गायन्ति त्वा गायत्रिण आ। अर्चन्त्यर्कमर्का २३ यिणाः। ब्रह्माणस्त्वा २ हो १ यि। शतक्रा २३ ताउ। उद्वंशमिवया १ यि मी ३ रे। उद्वंशा २३४ मी। वाया ३ उ वा ३। उप्। मा ऽ २ यिरो ३५ हायि। यत्सानोः सान्वारुह आ। भूर्यस्पष्टकर्तृ २३ वाश तं दिंद्रा २ हो १ यि। अर्थं चेता २३ तायि। यूथेन वृष्टिरा १ यि जा ३ तायि। यूथेना २३ वृ। ष्णायिरा ३ उवा ३। उप्। जातो ३५ हायि। युक्ष्वा हि केशिना हरी आ। वृषणा

कक्षियां २३ प्रा । अथा ना २ हो १ यि । इन्द्रासोमा २३ साः । गिरामुपश्रुता १ यिं चा ३ रा । गिरा सू २३४ या । श्रूता ३ उवा ३ । उप् । चा ऽ रो ३५ हा-यि । पूर्णाहुतिहोमपक्षेऽपि प्रस्तोतुः सामगानम् ।

Colophon: (Sheets 36 & 43)

इति श्रीमद्राजाधिराजपरमेश्वरहरिहरराजेत्यादि वैदिकमार्गस्थापनाचार्यस्य श्रीसायणाचार्य(स्य) कृतौ यज्ञतन्त्रसुधानिधौ औद्गात्राच्छा(वाक)प्रयोगः समाप्तः ॥

Subject: Yajñatantrasudhānidhi giving the duties of the Udgātṛ priest in the Agniṣṭoma sacrifice according to the Bodhāyana school of the Black Yajurveda.

Remarks:—The Ms. is in good condition. The Ms. originally belonged to one Gāmbhīri. On the title page is given—

औद्गात्रगणप्रयोगपुस्तकं गांभीरेः ॥

॥ प्रयोगसारः ॥

2604. PRAYOGASĀRAḤ.

Burnell's Catalogue No. 3699. Page 24. Left column. Substance—Paper. Size—9¼ × 4¼ inches. Sheets—40. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas —700. Author—Keśavasvāmin. Darśapurṇamāsa only.

Beginning:

श्रीगणेशाय नमः ॥

श्रियःपतिं नमस्कृत्य कण्वञ्च मुनिसत्तमम् ।
प्रयोगसारं वक्ष्यामि केशवोऽहं यथामति ॥

नारायणादिभिः प्रयोगकाररैका(रैरे)कं पक्षमाश्रित्य दर्शपूर्णमासादीनां प्रयोग उक्तः। आचार्यपादैर्द्वैधे पक्षान्तराण्यप्युक्तानि। भवस्वामिमतानुसारिणा मयात्रयमप्यङ्गीकृत्य प्रयोगसारः क्रियते अमावास्येनेत्यादि। प्रथमत एवामावास्यग्रहणं मन्त्रक्रमात् हविषेति सामान्यनिर्देशादेकवचनम्। पुरस्ताद्ग्रहणं कर्मारम्भात्पूर्वकाले आतञ्चनद्रव्यं यथा स्यात्। इतरथारब्धे कर्मणि द्रव्यालाभे दोषस्स्यात्। एतेनैव ज्ञापितत्वादन्यत्र आधानादिषु पुरस्ताद्ग्रहणं न करोति एवशब्दस्य न्यायादेव पूर्वकालत्वे सिद्धे यस्य प्रतिबन्धेनातञ्चनद्रव्यं न सम्भवति तस्य तस्मिन्नपि काले द्रव्यग्रहणेन दोषः स्यादिति ख्यापनार्थम्॥

End:

यज्ञस्य पुनरालम्भं जपति यज्ञो बभूवेति। आहवनीयमेतेन यजुषोपतिष्ठेत वा। अथ प्राङुक्र(त्क्र)म्य जपति। गोमाꣳ अग्न इति ब्राह्मणांस्तर्पयत वा इति सम्प्रेष्यति। दर्शपूर्णमासादिक्रत्विग्भ्योऽतिरिक्तेभ्य इतरेणोपाध्यायेन भोजनव्यवस्था चोक्ता—

यत्प्रेषितं ब्राह्मणतर्पणेन तदीदृगिष्टं प्रवदन्ति सन्तः।
दर्शौदनेष्टिस्तु पशौ शतं तत् सोमे सहस्रौदनमित्युवाहुः॥

दर्शपूर्णमासयोर्द्वैधे(धे)बहुधाविकल्पा उक्ताः। ग्रन्थप्रपञ्चभयाल्लोकाननुष्ठानाच्चात्र सर्वेपि नोक्तम्(क्ताः) लोकानुष्ठितपूर्वाः कतिचिदुक्ताः अतः परमपि तथैव भवति॥

Colophon:

इति श्रीकेशवस्वामिकृते प्रयोगसारे दर्शपूर्णमासौ समाप्तौ॥

श्रीयज्ञपुरुषार्पणमस्तु॥ शुभमस्तु। अविघ्नमस्तु॥

Subject: Prayogasāra. Darśapūrṇamāsa only based on 1—18 (17) Adhyāyas of the first praśna of the Bodhāyana sūtras of the Black Yajurveda.

Remarks :— The Ms. is in good condition. The author of this work is Keśavasvāmin and he is later than Bhavasvāmin, the commentator of the Bhodhāyanaśrautrasūtras, whom the author follows throughout in this work.

॥ प्रयोगसारः ॥

2605. PRAYOGASĀRAḤ.

Burnell's Catalogue No. 3747. Page 19. Right column.

Substance—Paper. Size—11⅝ × 4⅞ inches. Sheets—15. Lines—15 or 16 to a Page. Script—Devanāgarī. No. of Granthas—500. Author—Keśavasvāmin. Darśapūrṇamāsa only—incomplete.

Beginning, end and subject—Same as No. 3699.

Colophon :

इति केशवस्वामिकृते प्रयोगसारे पञ्चदशोऽध्यायः ॥

Subject: Prayogasāra—Darśapūrṇamāsa only. 1—15 Adhyāyas.

Remarks :— The Ms. is in a fairly good condition.

॥ प्रयोगसारः ॥

2606. PRAYOGASĀRAḤ.

Burnell's Catalogue No. 9140. Page 19. Right column.

Substance—Palm Leaf. Size—18¾ × 1⅛ inches. Leaves—332. Lines—5 to 7 to a Page. Script—Grantha. No. of

Granthas—8200. Author—Keśavasvāmin. Incomplete.

Beginning :— Same as No. 3609.

End:

अथैतं प्रसेकमग्ना वा यातयति । प्रसेकस्य दण्डस्तु चमसस्यैव दीर्घश्च मध्यश्चतुरश्रं विलमसृगिवास्य दीर्घाकराग्रमुदुम्बरश्चाग्नेर्दक्षिणतः पश्चाद्वा प्राकारं कृत्वा प्राकारमध्ये प्रसेकमग्न्यभिमुखं विलं कृत्वा प्राकाराद्बहिर्दक्षिणतो वोदङ्मुखं पश्चाद्वा प्राञ्चं प्राङ्मुखमन्तस्य विले स्रुवेण चतुर उपस्तीर्य नोपस्तीर्य वा अध्वर्युराह अप्रमत्तः सन्ततमाज्यवसोद्धारामिगति(मि?)ष्यामीति यत् कश्चित् सन्ततां घृतधारां प्रसेकबुद्धेन प्रक्षिपति यदाधारामिं प्रामोति तदारभते ॥

* ❀ ❀ *

उरुवातयेति किंशारुनिरसनं प्रतिबीजमावर्तते.....

अग्नये गृहपतये जुष्टमिति कृष्णानां व्रीहीणां.....

..... व्रीहीणां..... ॥

Colophon :

(Leaf No. 126).

इति केशवस्वामिकृते प्रयोगसारे चातुर्मास्यानि समाप्तानि । शुभमस्तु । चट्टनाथाय नमः ॥

(Leaf No. 114).

हरिः ॐ । शुभमस्तु । आपदुद्धारणेन लिखितम् । केशवस्वामिना अग्निष्टोमः समाप्तः । चट्टनाथाय नमः ॥

Subject: Prayogasāra containing prayogas of the following sacrifices:—

दर्शपूर्णमासौ ॥ Leaf No. 1— 36

उपव्याहरणम् ॥	Leaf	No.	36— ?
आधानम्	,,	,,	?— 57
दर्शाभ्यायी	,,	,,	57— 70
पशुबन्धः	,,	,,	70— 94
चातुर्मास्यम्	,,	,,	94—126
अग्निष्टोमः	,,	,,	126—214
उक्थ्यम्	,,	,,	214—218
षोडश्यादि	,,	,,	218—271
अग्निप्रयोगः	,,	,,	271—332

Remarks :—The Ms. is in a decaying condition. Many leaves in this Ms. are broken.

॥ प्रयोगसारः ॥

2607. PRAYOGASĀRAH.

Burnell's Catalogue No. 9141. Page 19. Right column. Substance—Palm leaf. Size—18½ × 1¾ inches. Leaves—89. Lines— 6 or 7 to a Page. Script—Telugu. No. of Granthas—1800. Author—Keśavasvāmin. Incomplete.

Beginning—Same as No. 3699.

End:

शिवाः पीता भव(ती)ति प्रसङ्गादुच्यते च्छर्दयित्वा निष्ठीवं कृत्वा जपति । यदत्रापि रसस्यामितिमात्रं करिष्यन् पुरीषं वा पृथिव्यां लोष्ठमादत्ते इयन्ते यज्ञिया तनूरिति, आदाय वस्त्रादिषु बध्वा तौ करोति अपो मुञ्चामि न प्रजामँहो मुच इति । ततः शौचं कृत्वा अप आचम्य

लोष्ठं तस्मिन् देशे निदधति पृथि....भवेति। स्वप्नेन्न? भुक्त्वा जपति "यदन्नमद्यते" इति। लोहितमुत्पतितं दृष्ट्वा कण्डूय वा जपति स मे रुद्रियाभ्य इति। वर्षे यदि यूपन्नमो वायव इत्येतामृचं जपेदिमानि नित्यानीति केचिदवान्तर-दीक्षयै। विसर्गादित्यन्ये। पुरानक्षत्राणामन्तर्धानादुत्तरेणा हवनीयं ति....

Subject: Prayogasāra, containing prayogas of the following sacrifices :—

1	दर्शपूर्णमासौ	Leaf	1
2	आधानम्	,,	25
3	दशाभ्यायी	,,	28
4	पशुबन्धः	,,	44
5	चातुर्मास्यम्	,,	59
6	सोमप्रयोगः	,,	80

Remarks:—The Ms. is in good condition. The Ms. abruptly breaks off in the middle of Somaprayoga.

॥ प्रयोगसारः ॥

2608. PRAYOGASĀRAH.

Burnell's Catalogue No. 3720. Page 19. Right column. Substance—Paper. Size —9¼ × 4¼ inches. Sheets—195. Lines—8 to 12 to a Page. Script—Devanāgarī. No. of Granthas—3450. Author—Keśavasvāmin. Incomplete.

Beginning:

श्रीगणेशाय नमः ॥

श्रीदक्षिणामूर्तये नमः ॥ हरिः ॐ ॥

इष्टिपशुचातुर्मास्यैरित्यनेन क्रमेण पशोरनन्तरं चातुर्मास्यान्युच्यन्ते । तेषां चत्वारः प्रयोगप्रकारा आचार्येणोक्ताः । एकस्तावद्यावज्जीवप्रयोगः । सांवत्सरप्रयोगो द्वितीयः । द्वादशाहप्रयोगो, यथाप्रयोग इति । द्वादशा-(ह)यथाप्रयोगयोरपरपक्षे यथा समाप्तिर्भवति तथा कर्तव्ये । यावज्जीवसांवत्सरप्रयोगयोः फाल्गुन्यां वा चैत्र्यां वा पौर्णमास्यामुपक्रमः । नक्षत्रप्रयोग इत्येतस्य विशेषणमुदगयन इत्यादि । यावज्जीवसांवत्सरी(रि)कयोः फाल्गुन्यां वा चैत्र्यां वा पौर्णमास्यामिति । नान्यः कालः ।

End :

देविकानामाज्यपक्षे त्रयः पक्षाः, आज्यपक्षे भेदेनानुष्ठाने प्रयोगः, औषधपदार्थवर्जमन्यद्भवति सर्वं यथार्थपात्राणि पात्रप्रोक्षणानन्तरं आज्यनिर्वापादि पर्यग्निकरणांतं ततो वेदा दानादि ध्रुवाज्यात् प्रधानानि स्विष्टकृदिडाञ्च इध्मप्रव्रश्चनान्यभ्याधाय फलीकरणं..... कुर्याद्वा न वा प्रसिद्धं ब्राह्मणतर्पणान्तरम् । एवमुत्तराण्यपि आमिक्षापक्षे च देविकानां चाज्येना..... ज्याहेवीका इज्यन्ते । अनुमती राका धाता सिनीवाली कुहूरिति पञ्चदेवताः । मध्यमं धातारं करोतीति अनुमतिराकाधात्रे उत्तराणिसिनीवाली कुहूधात्रे स्वानि स्वानिग्रहे नित्यानि अ..... ॥

Colophon: (sheet No. 170)

इति श्रीकेशवस्वामिकृते प्रयोगसारे माध्यन्दिनं समाप्तम् ॥

Subject: Prayogasāra—Cāturmāsya and Agniṣṭoma only based on the 5—8 Praśnas of the Bodhāyanasūtras of the Black Yajurveda.

Remarks:—The Ms. is in very good condition. This Ms. breaks off towards the end of Agniṣṭomaprayoga.

॥ प्रयोगसारः ॥

2609. PRAYOGASĀRAH.

Burnell's Catalogue No. 3782. Page 19. Right column. Substance—Paper. Size—$10\frac{1}{4} \times 4\frac{3}{5}$ inches. Sheets—22. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—400. Author—Keśavasvāmin. Vājapeya only.

Beginning:

श्रीगणेशाय नमः ॥

अथ केशवस्वामिकृते प्रयोगसारे

[सर्वपृष्ठासोर्यामः] वाजपेयस्य प्रयोग आरभ्यते । वाजपेयो नित्यः संस्थान्तःपातित्वात् । काम्यश्चाग्निष्टोमानन्तरं प्रयोक्तव्यः । ब्राह्मणराजन्ययोरेवाधिकारः । रथन्तरपृष्ठः वाजपेयोऽग्निश्चेतव्यो वा न वा । वाजपेयं करिष्यन्नित्यादि । स उपकल्पयते । कृष्णाजिनमित्यादिप्रसिद्धाः ।

* * *

शरदि पौर्णमास्यां प्रतिपदि वा सुत्या स्यात्तथा वा वसन्ते पौर्णमास्यां वा तथा दीक्षितव्यः । " याः पुरस्ता-

त्" इत्यादि सप्तदशस्तोत्रेण सप्तदशशस्त्रेण रथन्तरसाम्ना [सप्तदश] सप्तदशदक्षिणेन स्वर्गकामः आधिपत्यकामो वा ऋद्धिकामो वा सर्वकामो वाजपेयेन सोमेन यक्ष्य इति सङ्कल्पः ॥

End:

अथैताश्चमसानित्यादि । अथ संप्रैषमाह— अग्नीदौपयजानङ्गारानित्याद्येकैकं गुदतृतीयमेकादशधा कृत्वा सर्वान्पुनरेकादशधा कृत्वोपयजति । समस्तानुग्रहृत्य सर्वमन्त्रैरनुमन्त्रयेद्वा । समानमत ऊर्ध्वमुदवसानीयान्तम् । एवं क्रतुशेषं समाप्यानन्तरममावास्यायां प्रतिपदि वा [काम] कामनावर्जं प्रत्यवरोहणीयसंज्ञेन चतुष्टोमेनाग्निष्टोमेन वाजपेयाङ्गभूतेन यजेत । सन्तिष्ठते वाजपेयेनेत्युक्ते पुनः सन्तिष्ठते वाजपेय इति वाजपेयग्रहणं प्रत्यवरोहणीयस्य वाजपेयस्याङ्गत्वख्यापनार्थम् ॥

Colophon:

इति केशवस्वामिकृते प्रयोगसारे वाजपेयः समाप्तः ॥

Subject: Prayogasāra. Vājapeyaprayoga only based on Bodhāyanaśrautasūtras of the Black Yajur-Veda.

Remarks :— The Ms. is in good condition.

॥ प्रयोगसारः ॥

2610. PRAYOGASĀRAH.

J. L. Collection No. 260. Substance—Paper. Size—10×4 inches. Sheets—18. Lines—9 to a Page. Script—Deva-

nāgarī. No. of Granthas—400. Author—Keśavasvāmin. Vājapeya only.

Beginning, end, colophon and subject—Same as No. 2609.

Remarks :—The Ms. is in good condition.

॥ प्रयोगसारः ॥

2611. PRAYOGASĀRAḤ.

Burnell's Catalogue No. 9172 b. Substance—Palm Leaf. Size—16 × 1½ inches. Leaves—16 (42—57). Lines—8 to a page. Script—Grantha. No. of Granthas—480. Author—Keśavasvāmin. Nakṣatreṣṭi only.

Beginning :

अथातो नक्षत्रेष्टिं व्याख्यास्यामः ।

"अग्निर्वा अकामयत । अन्नादो देवानाँ स्यामिति" ता ब्राह्मणव्याख्याता(ः) [म]साया वैशाख्या पूर्णमास्याः पुरस्तादमावास्या भवति । सा सकृत्संवत्स्यापभराणिस्सम्पद्यते । तस्यामारभेतेति तस्याम्युपसेधोरण्योरग्नीन्समारोप्य उदवसाय मथित्वाग्नीन्विहृत्याजस्रान्वापि वा पौर्णमासीममावास्यां वोपवसेत् । यद्यस्यां तल्लक्षा संपद्यते, तत्रैषोत्यन्तप्रदेशो हविरुच्छिष्टव्रतो भवतीति विज्ञायते । अपि वा जन्मनक्षत्रे कुर्यादायुष्कामस्त्यवराद्धर्यो वा प्रयोगो जीवन्तावाज्यभागौ यजति "आनो अग्ने सङ्केतुना त्व सोम महे भगम्" इति ॥

End:

तस्यामेवरात्र्यां सौरीष्ट्या यक्ष्ये समानानां प्रतिष्ठास्यामिति सङ्कल्पः । वि + पौर्णः । सौर्यञ्चरुराग्नेयविकारः । सूर्याय नक्षत्रेभ्यो जुष्टम् । सूर्यनक्षत्र हव्यं रक्षस्व । मन्त्रेणाभिघारणम् । रात्रौ हविरासादनं कृत्वोदितेसूर्ये आचर्य, सूर्याय नक्षत्रेभ्योऽनुब्रूहि सूर्य नक्षत्राणि यज । "उदुत्यम्, चित्रम्" इति याज्यानुवाक्ये । सूर्यनक्षत्राणामहमन्नादः । सूर्याय स्वाहेति त्रय उपहोमाः । सूर्योनक्षत्राणीदं हविरजुषेत्यादि सन्तिष्ठते । आदित्येष्ट्या यक्ष्ये भूम्यां प्रतिष्ठां विदेयमिति । वि + पौर्णः + न्त्रं आग्नेयविकारः आदित्यैः जुष्टम् । अदिते हव्यम् + म + णं अमावास्यतन्त्रममावास्यन्तन्त्रमिति तत्र तत्रोक्तम् । नक्षत्रहविषामाग्नेयविकारोऽयमैन्द्राग्नविकारोऽयमिति च तत्र तत्रोक्तम् । तेषां तन्त्राणामितिकर्तव्यताश्चोक्ताः । यथामति तत्सर्वं तत्रानुसन्धातव्यम् ॥

नक्षत्रेष्टिषु वक्तव्यं कर्तव्यञ्च विशेषतः ।
तत्रैकादश एवोक्तो मन्दबुद्धिमतां यथा ॥

मोहादज्ञानतो वापि यन्मया किञ्चिदीरितम् ।
वृत्तिं वीक्ष्यानुगृह्णन्तु सन्तस्तां वीतमत्सराः ॥

(नक्षत्रेष्टिं) प्राह बोधायनस्त-
त्तन्त्रं चापस्तम्बसूत्रोक्तमार्गे ।
प्राहाल्पानां बोध[य]नायप्रयोगं
भारद्वाजः केशवः सोमयाजी ॥

Colophon :

नक्षत्रेष्टिप्रयोगः ॥

Subject : Prayogasāra—Nakṣatreṣṭiprayoga only.

Remarks :—The Ms. is in a decaying condition. For the other works contained herein see Remarks under No. 2057.

॥ बोधायनश्रौतप्रयोगवृत्तिः ॥

2612. BODHĀYANAŚRAUTAPRAYOGA-VṚTTIḤ.

Burnell's Catalogue No. 3695. Page 24. Left column. Substance—Paper. Size—10×5⅝ inches. Sheets—105. Lines—9 to 11 to a Page. Script—Devanāgarī. No. of Granthas—2000. Author—Mahādevavājapeyayājin. Darśa-pūrṇamāsa only.

Beginning :

श्रीगणेशाय नमः ॥

श्रीसरस्वत्यै नमः ॥

ॐ ॥ इष्टेर्वृष्टिरुदेति वृष्ट्युपचयादन्नानि तेभ्यः प्रजा-
स्ताभ्यो यज्ञसमुद्भवः पुनरिति प्रक्रान्तचक्रक्रमः ।
अत्रामुत्र समीहितार्थघटनाबद्धव्रतो यो जग-
ज्जन्मस्थेमलयोत्सवः स दिशतु श्रेयांसि यज्ञेश्वरः ॥

वेदोदधेर्विनिर्माय योधात्कल्पाभिधां सुधाम् ।
विबुधेभ्यो नमस्तस्मै बोधायनमहात्मने ॥

बोधायनाय मुनये मुनिसङ्घाहृताङ्घये ।
कर्माम्बुधितितीर्षूणां कल्पनौकाकृते नमः ॥

अस्ति बोधायनं सूत्रमाद्यमाध्वर्यवाश्रितम् ।
अश्वीतिबोधाचरणप्रचारैस्त(त्प्रपञ्चयन्).... ॥

भारद्वाजान्वयाम्भोधिसुधांशुस्सत्सुसंमतः ।
त्रियम्बकाध्वरी लोके त्र्यम्बकस्तज्ञस्समेधते ॥

तदध्वर्युर्महादेववाजपेयी तदाज्ञया ।
बोधायनोक्तकर्मान्तद्वैधकल्पानुसारतः ॥

वैतानिकानां संस्थानां भवस्वामिमतानुगाम् ।
कर्माध्वगानां सुगमां करोति श्रौतचन्द्रिकाम् ॥

"ब्राह्मणानां बहुत्वादेकैकस्यां शाखायामसमाप्तत्वाद-र्थस्य च दुर्बोधत्वादसार्वजन्यत्वाच्चोपसंहृत्य विवरणार्थं सुखं बुध्वा कर्माण्यनुष्ठा(ष्ठी)य फलं सर्वे प्राप्नुयुः" इति परमकारुणिकेनाचार्येण भगवता बोधायनेन कल्प आरब्धः ॥

जायामवाप्य दशमेऽहन्यादधीत । जातपुत्रः कृष्णकेशो-ऽग्नीनादधीत । विद्यां समाप्य दारं कृत्वाग्नीनाधाय कर्मा-ण्यारभते सामावराध्यानि यानि श्रूयन्ते—

"धर्मेणाधिगतो येषां वेदः सपरिबृंहणः ।
लब्धपुण्यधनाढ्यानामग्न्याधेयमिहोच्यते ॥"

इत्यादिवचनाद्गर्भाधानादिसंस्कारैस्संस्कृतोऽधीत्य वेदं न्यायतः कृतदार आहिताग्निर्न्यायार्जितधनश्च वैतानिकेषु कर्मस्वधिक्रियते । तानि च कर्माणि—अग्न्याधेयमग्निहोत्रं दर्शपूर्णमासावाग्रयणं चातुर्मास्यानि दाक्षायणयज्ञः कौण्ड-

पायिन्यः सौत्रामणिमुद्दैके ब्रुवते इति सप्तहविर्यज्ञसंस्थाः ॥

❀ ❀ ❀ ❀

(Sheet No. 14).

'विसंस्थिते संस्थिते च सञ्चर' इत्यादि। विसंस्थितेऽसमाप्ते कर्मणि सञ्चरः प्रवेशो निर्गमश्च संस्थिते समाप्ते कर्मणि पश्चादित्यर्थः। आग्न्याधेयिके विहार इदं विधानमितरत्र "तस्माद्यज्ञवास्तुनाभ्यवेत्यम्" इति निषेधात्। अहोरात्रावित्येकं यावदग्नयश्शीतास्युरित्येकं यावदेनदभिवर्षेत्येतदपरमिति ॥

॥ इत्युपोद्घातः ॥

ॐ "आमावास्येन पौर्णमासेन वा हविषा यजेत(क्ष्य)माणो भवति। स पुरस्तादेव हविरातञ्चन उपकल्पयत एकाहेन वा द्व्हेन वा यथर्त्वथ वै ब्राह्मणं भवति। दक्षातनक्ति सेन्द्रत्वायाग्निहोत्रोच्छेषणमभ्यातनक्ति यज्ञस्य सन्तत्या" इति—

अथेत्यधिकाराकरणं तयोरेवारम्भात् पौर्णमास्यादित्वेऽप्यमावास्यायाः प्रथमं ग्रहणं मन्त्रक्रमात्। दाक्षायणयज्ञादौ शाखाहरणाद्यारम्भस्य पौर्णमास्यामप्युपकारात्, अ(आ)मावास्येन पौर्णमासेनेत्यत्र तद्धितश्च कालप्रकृतेः "तस्येदम्" इति भवार्थे वा विध्यपेक्षः। वा शब्दः समुच्चयार्थः।

❀ ❀ ❀

(Sheet No. 20)

अथ प्रयोगक्रमः ॥

'आमावास्येन पौर्णमास्येन वा + सन्तत्या इति ।'
हविरातञ्चनं दधि तस्य ग्रहणम् । पुरोडाशीयादीनां प्रदर्शनार्थं ग्रीष्मे एकाहेन हेमन्ते द्व्हेनेति व्यवस्थितो विकल्पः दधिभावायेति भावः । सोऽयमाहिताग्निरुपवसथीयेऽहन् अ(न्य)मावास्यायां पौर्णमास्याञ्च पुरा प्रातराग्निहोत्रात्पिऽखा(का)नुपसादयेत् ।

End:

अथ यज्ञस्य पुनरालम्भं जपति "यज्ञो बभूव स आबभूव । स प्रजज्ञे सवावृधे । स देवानामधिपतिर्बभूव सो अस्माꣳ अधिपतीन्करोतु वयꣳ स्यामपतयोरयीणाम्" इति सूत्रं बोधायनस्य । आवहनीयमवैतेन यजुषोपतिष्ठेतेति शालीकिः । अथप्राङुत्क्रम्य जपति "गोमाꣳ अग्नेविमाꣳ अश्वी यज्ञोनृवत्सखासदमिदः प्रमृष्यः । इडावाꣳ एषो असुरप्रजावान् दीर्घो रयिः पृथुबुध्नः सभावान्" । आत्मानं सम्प्रेषति ।

दशौदनाः स्थूरिष्टीनां पशूनां शतमोदनाः ।
सहस्रमोदनाः सोम इत्याहुर्ब्रह्मतर्पणम् ॥

"ब्राह्मणाꣳ स्तर्पयत वै" इति सम्प्रेष्य, ऋत्विग्भ्योऽन्यानपि ब्राह्मणान् यथासम्भवं भोजयेत् ॥

Colophon :

इति श्रीमद्भारद्वाजकुऽजलधिकौस्तुभपूर्वोत्तरमीमांसाद्वयपारावारपारीणश्रीत्र्यम्बकरायाध्वरीन्द्रानुमताभ्यर्युमहादेववाजपेययाजी(जि)विरचितायां श्रीबोधायनसूत्रश्रौतप्रयोगवृत्तौ दर्शपूर्णमासपद्धतिः ॥

Subject : Bodhāyanaśrautasūtraprayogavṛtti otherwise known

as Sūtrakramapaddhati based on the first Praśna (Darśapūrṇamāsa) of the Bodhāyanasūtras of the Black Yajur-Veda.

Remarks:—The Ms. is in good condition. After the colophon the following is given

'प्रदक्षिणनमस्कारानुपचारान् अग्ने नयेत्यादि, सकृत्ते नम इत्यादि अग्ने नय पञ्चर्चः, प्रवःशुक्राय० अच्छागिरोमत० प्रकारवो० प्रमादात्० प्रायश्चित्ता० नमस्ते गार्हपत्याय० काण्डद्वयोप० सकृत्ते नमः अनृणा अस्मि०

स्वरेण वर्णेन च यद्विहीनं तथैव हीनं क्रिययापि यच्च ।
यच्चातिरिक्तं मम तत् क्षमस्व तदस्तु चाग्ने परिपूर्णमेतत् ॥
शमीगर्भस्य यो गर्भस्तस्य गर्भस्य यो रिपुः ।
रिपुगर्भस्य यो गर्भः स मे विष्णुः प्रसीदतु ॥

॥ बोधायनश्रौतप्रयोगवृत्तिः ॥

2613. BODHĀYANAŚRAUTAPRAYOGA-VṚTTIḤ.

J. L. Collection No 261. Substance—Paper. Size—$10\frac{1}{4} \times 4\frac{1}{4}$ inches. Sheets—54 (12-66, 26th missing). Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—1200. Author—Mahādevavājapeyin. Darśapūrṇamāsa only.

Beginning, end, colophon and subject—Same as No. 2612.

Remarks:—The Ms. is in a fairly good condition. While quoting Ṛks in their proper use, only the beginnings (pratīkas) are given in this Ms. Hence a deficiency of 800 Granthas in this Ms. Compare No. 3695.

॥ बोधायनश्रौतप्रयोगवृत्तिः ॥

2614. BODHĀYANAŚRAUTAPRAYOGA-VṚTTIH.

Burnell's Catalogue No. 3696. Page 23. Right column. Substance—Paper. Size—$11\frac{1}{2} \times 4\frac{3}{8}$ inches. Sheets—32. Lines—7 to a Page. Script—Devanāgarī. No. of Granthas—500. Author—Mahādevavājapeyayājin. Darśapūrṇamāsa only—incomplete.

Beginning:

श्रीलक्ष्मीनृसिंहाय परमगुरवे परदेवतायै नमः ॥ श्रीः । शुभमस्तु ॥

वेदोदधेर्विनिर्माय योवक(धान्क)ल्पाभिधां सुधाम् ।
विबुधेभ्यो नमस्तस्मै बोधायनमहात्मने ॥

बोधायनाय मुनये मुनिसङ्घादृताङ्घ्रये ।
कर्माम्बुधितितीर्षूणां कल्पनौकाकृते नमः ॥

अस्ति बौधायनं सूत्रमाद्यमाध्वर्यवाश्रि(तम्) ।
अधीतबोधाचरणप्रचारैस्तत्प्रपञ्चयन् ॥

भरद्वाजान्वयाम्भोधिसुधांशुः सत्सु सम्मतः ।
नरसिंह्माध्वरी लोके विम्बकः (त्र्यम्बकः) समेधते ॥

तदध्वर्युमहादेववाजपेयी तदाज्ञया ।
बोधायनोक्तकर्मान्तद्वैधकल्पानुसारतः ॥

वैतानिकानां संस्थानां भवस्वामिमतानुगाम् ।
कर्माध्वनीनसुगमां करोति क्रमपद्धतिम् ॥

आगर्भाधानादिसंस्कारैः संस्कृतोऽधीत्य वेदं न्यायतः कृतदार आहिताग्निर्वैतानिकेषु कर्मस्वधिक्रियते । तानि

च कर्माणि अग्न्याधेयमग्निहोत्रं दर्शपूर्णमासावाग्रयणं चातुर्मास्यानि दाक्षायणयज्ञः कौण्डपायिन्यः सौत्रामणि बृहैके ब्रुवत इति सप्तहविर्यज्ञ(सं)स्थाः०

आहवनीयागारे यजमानः शेते । ....पौर्णमास्या सद्यो यजध्वे अनवधानादि न किं यजनीय...अहन्मे भवति ।

अचा(न्वा)धानादि दर्शे चेदुपरोधान्नलभ्यते ।
कालस्य गुणभूतत्वात्सद्यस्काल्यपि दार्शिकी ॥
श्वत्यात्सान्नाय्ययागेऽपि दध्यानीयाभिमन्त्राणाम् ।

.....

पयस्वत्या समिद्भिश्च व्रतोपेतस्य यज्वनः ।
शाखाच्छेदनमित्येष क्रमोऽन्योवापरेऽहनि ॥

Colophon : Nil.

Subject. Bodhāyanaśrautasūtraprayogavṛtti otherwise known as Kramapaddhati based on the 1st Praśna of the Bodhāyanasūtras of Black Yajur-Veda.

Remarks :—The Ms. is in good condition. This Ms. abruptly ends in the middle of Darśapūrṇamāsaprayoga.

॥ बोधायनश्रौतप्रयोगवृत्तिः ॥

2615. BODHĀYANAŚRAUTAPRAYOGA-VṚTTIḤ.

Burnell's Catalogue No. 3684. Page 23. Right column. Substance—Paper. Size—$11\frac{3}{5} \times 4\frac{2}{5}$ inches. Sheets—40. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—750. Author—Mahādevavājapeyin. Ādhāna only.

Beginning :

श्रीमहागणपतये नमः ॥

श्रीलक्ष्मीनृसिंहाय परदेवतायै श्रीगुरुभ्यो नमः ॥

नत्वा बोधायनाचार्यमग्न्याधेयस्य कर्मणः ।

महादेवो वाजपेयी करोति क्रमपद्धतिम् ॥

धर्मेणाधिगतो येषां देवस्य (वेदः स)परिबृंहणः ।

(लब्धपुण्यधनाढ्याना)मग्न्याधेयमिहोच्यते ॥

इत्याद्यधिकृतस्याग्न्याधेयकालो निरूप्यते । "जातपुत्रः कृष्णकेशी" इति वाक्यानि यानि तु तानि शक्तिपराणि .....कर्मसु जात..... .....दशमेह्न्यादधीतेति दर्शनात् ॥ अथातो नक्षत्राणामेव मीमांसा कृत्तिकास्त्व(स्व)ग्निमादधीत रोहिण्यामग्निमादधीत स पुनर्वस्वोरग्निमादधीतपूर्वयोः फल्गुन्यु(न्योऽ)त्तरस्योः फल्गुन्योश्चित्रायामिति ॥ अथात ऋतूनामेव मीमांसा । वसन्ते ब्राह्मणोऽग्निमादधीत ग्रीष्मे राजन्यः शरदि वैश्यो वर्षासु रथकार इति । अथो खलु यदैवेनं श्रद्धोपनमेदथादधीति ? सैवस्यध्द(र्धि)रिति तदे-[द]तदार्तस्य वातिवेलं वा श्रद्धायुक्तस्याथ वै ब्राह्मणं भवति यो (रो)हिण्यामग्निमाधधत(धत्त)ऋध्नोत्येव सर्वम् रोहान् रोहतीति सा या वैशाख्याः पौर्णमास्या उपरिष्टादमावास्या भवति सा सकृत्संवत्सरस्य रोहिण्यां संपद्यते तस्यामादधीतेति ॥

End:

कथं खल्वग्न्याधेये सोम इति पूर्णाहुतिः इत्यन्तं कर्म कृत्वा शालामध्यवस्येत् दीक्षणीयामामेयोऽष्टाकपालोऽनुव-

र्तेत प्रायणीयामैन्द्राग्नश्चादित्यश्च चरुरातिथ्यामग्नये पव-
मानायाष्टाकपालो० ग्नीषोमीयस्य पशुपुरोडाशमग्नये पा-
वकायाग्नये शुचये प्रातःसवनीयामन्वारम्भेष्टिरपि वा
सर्वाण्येवाग्न्याधेयिकानि हवींषि परिसमाप्य शालामध्य-
वस्येदुदवसानीयामन्वारम्भेष्टिरिति ॥

Colophon :

इति बोधायनाधानप्रयोगः ॥ श्रीमद्दिव्यलक्ष्मीनृसिंहार्पणमस्तु ॥

श्रीपरदेवतार्पणमस्तु ॥ श्रीः ॥

Subject: Bodhāyanaśrautasūtraprayogavṛtti, otherwise known as Kramapaddhati and also Prayogacandrikā. Ādhana only based on the 2nd Praśna of the Bodhāyana sūtras of the Black Yajur-Veda.

Remarks :—The Ms. is in a fairly good condition. This Ms. is full of scriptorial blunders.

॥ बोधायनश्रौतप्रयोगवृत्तिः ॥

2616. BODHĀYANAŚRAUTAPRAYOGA-VṚTTIḤ.

J. L. Collection No. 262. Substance—Paper. Size—10½ × 4¼ inches. Sheets—27 (1-39, 25 to 36 are missing). Lines — 9 to a Page. Script—Devanāgarī No. of Granthas— Author—Mahādevavājapeyin. Ādhāna only.

Beginning, end, colophon and subject—Same as No. 2615.

Remarks:—The Ms. is in a fairly good condition.

॥ बोधायनश्रौतप्रयोगवृत्तिः ॥

2617. BODHĀYANAŚRAUTAPRAYOGA-VṚTTIḤ.

J. L. Collection No. 263. Substance—Paper. Size—10¼ × 4¼ inches. Sheets—32. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—620. Author—Mahādevavājapeyayājin. Nirūḍhapaśubandha only.

Beginning :

श्रीमहागणपतये नमः ॥

श्रीमद्दिव्यलक्ष्मीनृसिंहाय परमगुरवे ललिताम्बायै नमः ॥

श्रीरस्तु ॥

बोधायनमुनीन्द्रोक्तकल्पसूत्रानुसारतः ।
पशुबन्धप्रयोगस्य क्रियते क्रमपद्धतिः ॥

प्रत्यब्दं द्विः पशुं कर्यादादावयनयोर्द्वयोः ।
समनन्तरे पर्वणि ।
दर्शेज्यानन्तरं वापि शुक्लेदेवर्क्षयेव वा ।
पशुकामस्य रेवत्यां पश्विज्येति प्रचक्षते ॥

एवं पशुद्वयं कर्तुमशक्तः प्रतिवत्सरम् ।
एकं पशुं वा कुर्वीत तदा कालविधानतः ॥

उत्तरायणशुक्लादिः कालः सामान्यशास्त्रतः ।
यद्वा प्रावृषि पश्विज्या भवेत्कात्यायनाशयात् ॥

कात्यायनश्च–"पश्विज्या संवत्सरे संवत्सरे प्रावृष्यावृत्तिमुखयोर्वा" इति ॥ पशुना यक्ष्यमाणो भवति स उपकल्पयते० ॥

End:

अथैके आचार्याः । एकादशधर्मान् पशुबन्ध उत्साद-यन्त्यग्न्यन्वाधानं व्रतोपायनं पृस्थ्यां(?) प्रणीता याज-मानमाज्यभागौ प्राशित्रं यजमानभागब्रह्मभागीचतुर्धाक-रणविष्णुक्रमानिति । यजमानोत्सादनपक्षेऽपि व्रतोपा-यनव्रतविसर्जन यज्ञस्य पुनरालम्भ इति भवन्ति । आज्या-वकाशमुहैके ब्रुवते ॥

Colophon:

श्रीमद्भारद्वाजकुलजलधिकौस्तुभपूर्वोत्तरमीमांसाद्वयपारावारपारीणश्रीम-त्र्यम्बकरायाध्वरीन्द्रानुमताध्वर्युमहादेववाजपेययाजिविरचितायां **बोधायनसूत्रप्रयोगवृत्तौ** निरूढपशुबन्धक्रमपद्धतिः स-माप्ता ॥ श्रीदिव्यलक्ष्मीनृसिंहार्पणमस्तु ॥ श्रीपरदेवतार्पणमस्तु ॥ श्रीलक्ष्मीनृसिंहाय नमः ॥

Subject: Bodhāyanaśrautaprayogavṛtti otherwise known as Kramapaddhati giving the Paśubandhaprayoga according to the Bodhāyana school of the Black Yajur-Veda.

Remarks:—The Ms. is in a fairly good condition. After the colophon the following is given:—

मूलप्रदेशेऽरत्निमात्रमपरं त्यक्त्वा शिष्टमष्टाश्रिं चतुरश्रिं वा तक्षेत् + वे-दुत्तरां सशङ्कुमारभ्य प्रत्यक् पदद्वयं त्रयं वा नीत्वा ततः शङ्कुं निह-न्यात । शम्यामात्रश्चत्वारः तथैव पदचतुष्टयं नीत्वोदगेकं नी-त्वा शङ्कुं णि० स उत्करः एवं वेदिः ॥

॥ बोधायनश्रौतक्रमपद्धतिः ॥

2618. BODHĀYANAŚRAUTAKRAMA-PADDHATIḤ.

Burnell's Catalogue No. 3725. Page 25. Left column. Substance—Paper. Size—11¾×4⅝ inches. Sheets—193. Lines—7 or 8 to a Page. Script—Devanāgarī. No. of Granthas—3500. Author—Mahādevavājapeyayājin(?) Agniṣṭoma only.

Beginning:

श्रीगणेशाय नमः ॥

श्रीमद्दिव्यलक्ष्मीनृसिंहाय नमः । श्रीगुरुभ्यो नमः ॥

बोधायनीयकल्पोक्तत्रयीमार्गानुसारिणीम् ।
अग्निष्टोमक्रतोरेषा क्रियते क्रमपद्धतिः ॥

अग्निष्टोमेन यक्ष्यमाणो भवति । स उपकल्पयते कृष्णाजिनञ्च कृष्णविषाणञ्च वासश्च मेखलाञ्च सैषा पृथ्वी वेणी कार्या भवति त्रिवृदेकतः पाशाद्वा विंशतिञ्च दर्भपुञ्जीलानि नवनीतं चाञ्जनञ्च सतूलाञ्च शरेषीकौमादुम्बरं दण्डञ्चमसञ्च व्रतप्रदानं स्थालीं सश्रिक्यां समेक्षणामेतानि त्रयोदश यजमानस्तावन्त्येव पत्नीर्मितो भवन्ति कुंबं च कुरीरञ्च वासश्च योक्त्रञ्च शङ्कुं चापरिमितानि दर्भपुञ्जीलानि नवनीतं चाञ्जनं च सतूला च शरेषीका मृन्मयपात्रः शङ्कुश्च स्थाली सश्रिक्या समेक्षणा ।

अत्र कारिकाः—

कृष्णाजिनादिसंभारान्पूर्वमेवोपकल्पयेत् ।
कृष्णाजिनानि पञ्च स्युरेकं सर्वाङ्गसंयुतम् ॥

सर्वाङ्गसंयुतं यष्टुरन्यत्सोमप्रवर्ग्ययोः ।
विषाणास्त्रिबलिः पञ्च बलिर्वा परिकीर्तिता ॥

मधुपर्कार्थवस्त्राणां द्वाषष्टिः परमावधि ।
कांस्यानि सपिधानानि कुण्डलानां युगानि च ॥

❀ ✲ ❀

प्राशस्त्येन च लभ्यन्ते सहस्रमपि दक्षिणा(ः) ।
प्रवर्ग्यार्थानि पात्राणि यथासूत्रं प्रकल्पयेत् ॥

ज्योतिष्टोम इति कर्मनामधेयम् । तस्याग्निष्टोम इति संस्थानाम । अग्निष्टोमेन स्तोत्रेण समाप्यत इति तस्य ज्योतिष्टोमस्य तिस्रः संस्था अग्निष्टोम उक्थ्योऽतिरात्र इति । चतस्रः संस्था षोडशिना सहेत्यन्ये ।

End:

अथारण्योरग्नीन्समारोह्य स्वान्यग्न्यायतनान्यध्यवसाय मथित्वा विहृत्य मनस्वत्या हुत्वा काले विहृत्य सायमग्निहोत्रं जुहोति । प्रागस्तमयादसमाप्तौ अनुद्धरणप्रायश्चित्तं न कुर्यात् । कुर्यादित्येके । होमकालस्याप्यतिपत्तौ प्रतिहोमं कुर्यान्न कालातिपत्तिप्रायश्चित्तम् । अग्निहोत्रयोः प्रतिहोम इति प्रतिजुहुयादिति बोधायनः । न प्रतिजुहुयादिति शालीकिः ।

अत्र क्रमकारिकाः—

मैत्रावरुण्यास्त्वथ मुष्टिवेदौ
कृत्वाथ पाणी च परिस्तरं च ।
स्फ्यःप्रोक्षणीपात्र जुहूपभृच्च
स्रुवध्रुवेडाध[ा]रमेक्षणानि ॥

वेदाज्यधान्यग्न(?) दोहधान्यः
पृष्ट्याभिमौदेत्र उदुञ्जचोक्षेत् ।
प्रातस्तु दुग्ध्वा श्रपयेत्पयस्यां
विस्राव्य चाज्यं च निरूप्य रक्षः ॥

* * * *

अनुष्ठितावत्र न पूर्वतः स्या-
दामिक्षया साकमतोऽन्यथा वा ।
प्रत्यक्षतो वापि हरेच्च वह्नीन्
यथा पुरा निष्क्रमणे तथा वा ॥

होमातिपत्तौ प्रति होममेके
उपक्रमेताप्यहुतं पुरा चेत् ।
आरम्भणीयाप्यकृता पुरा चे-
दाधानसोमे कुरुते समाप्ते ॥

श्रीमद्दिव्यलक्ष्मीनृसिंहार्पणमस्तु । श्रीविश्वेश्वराय नमः ।
श्रीराचन्द्राय नमः । श्रीशिवाय नमः । श्रीगणेशाय नमः ॥

Colophon : Nil.

Subject : Bodhāyanaśrautakramapaddhati giving the prayoga of the Agniṣṭoma sacrifice according to the Bodhāyana school of the Black Yajur-Veda.

Remarks : —The Ms. is in good condition.

॥ बोधायनश्रौतक्रमपद्धतिः ॥

2619. BODHĀYANAŚRAUTAKRAMA-PADDHATIḤ.

Burnell's Catalogue No. 3752. Page 25. Right column. Substance—Paper. Size—10½ × 5⅛ inches. Sheets—20. Lines—9 to a page. Script—Devanāgarī. No. of Granthas—350. Author—Vāsudevadīkṣita. Kāṭhakaciti only. Incomplete.

Beginning:

श्रीगणेशाय नमः ।

वासुदेवो यायजूको बोधायनमहामुनिम् ।
प्रणम्य काठकाग्नीनां तनोति क्रमपद्धतिम् ॥

सावित्रं स्वर्गकामश्चिन्वीत पशुबन्धे चेचीयते । षड्ढोतारं हुत्वा यूपाहुतिं हुत्वा यूपं सयजुषं कृत्वा वेदिं विमिमीते । वेदितृतीये यजत इति विज्ञायते । पश्वर्थमुदवसाय षड्ढोतुः पुरस्ताद्याः पुरस्तादित्यादि स्वर्गकामः सावित्रमग्निं चेष्ये इति सङ्कल्पयते । परमेश्वरप्रीत्यर्थमिति वा । अहकालत्वे प्रयोगः ॥

End:

दक्षिणानां काले । ब्रह्मा सदस्यासी(ना)न्वो वैश्वसृजान्व्याचष्टे । "ऋचां प्राची महती दिगुच्यते" इति । पच्छोऽर्धर्चशः । ब्रह्मणो वेत्थ शस्त्रमाध्वर्युः प्रतिगृणाति । "ॐ ब्रह्मन् ऋतं ब्रह्मन् सत्यं ब्रह्मन् अरात्स ब्रह्मन्" इति । तस्योत्तमे पर्याये "अरात्स ब्रह्मन्सम्पद्ये" । सन्तिष्ठते वैश्वसृजः ।

Colophon:

इति वासुदेवदीक्षितकृतसावित्रादिकाठकचयनं संपूर्णम् ॥

Subject: Bodhāyanaśrautakramapaddhati giving the prayogas of the following sacrifices :

(1) सावित्रचयनम्
(2) नाचिकेतचयनम्
(3) ब्रह्मचिच्चयनम्
(4) समस्तचयनम्
(5) वैश्वसृजचयनम्

Remarks:—The Ms. is in good condition. The Āruṇaketukaciti of of the Kāṭhakaciti is omitted in this Ms.

॥ प्रयोगरत्नम् ॥

2620. PRAYOGARATANAM.

Burnell's Catalogue No. 9167. Page 24. Left column. Substance—Palm Leaf. Size—16 × 1½ inches. Leaves—107. Lines—8 to a Page. Script—Grantha. No. of Granthas—3600. Author—Vāsudevadīkṣita. Complete ?

Beginning :

श्रीमहागणपतये नमः ॥

धर्मायनबोधायन-
मीहध्वे यादि तद्भुवे किमपि ।
बोधायनबोधायन-
माचार्यं मुहुर्मुहुर्नमत ॥
सङ्गृह्य द्वैधकर्मान्तकल्पसूत्राणि यत्नतः ।
प्रयोगरत्नं तनुते वासुदेवाध्वरीसुधीः ॥

अथ पौर्णमास्यामावास्यायाञ्च हुते प्रातरग्निहोत्रे यजमानः केशश्मश्रु वापयित्वा लोमानि संहृत्य नखानि निकृन्तयीत । न वा वापयते । तीर्थे स्नात्वाहतं वासः प-

रिषाय नवनीतेनाभ्यञ्जीत । मुखमग्रेऽनुलोमा(म)ङ्गानि । त्रैककुदनाञ्जनेनाङ्के । त्रिदक्षिणं द्विरुत्तरं निधावं एवं पत्नीवपनवर्जम् । ऋतिजश्च स्नाता अहतवाससो भवन्ति ।

End:

अथादित्यमुपतिष्ठते । देवसंस्थानसहस्रपोपस्ये श्रिषेसनोरास्वाज्यानि रायस्पोषं सुवीर्यं संवत्सरीणां स्वस्तिमिति । अथ यूपमुपतिष्ठते । आशासानसुवीर्यं रायस्पोषं स्वश्वियं बृहस्पतिना राया स्वगाकृतो मह्यं यजमानाय तिष्ठेति उपोषणाद्येनदन्तम् ।

❀ ❀ ❀ ❀

दार्शिकविहारस्य दक्षिणतो गत्वा यज्ञो बभूवेति पुनरालम्भं जपित्वा प्राङुत्क्रम्य गोमामग्न इति जपित्वा.... ...भाजेति अपि वा पूर्णाहुत्यनन्तरं दार्शिक एव विहारे विष्णुक्रमणादि ब्राह्मण तर्पण सन्प्रैषान्तं करोति । स...

Colophon : (1) (Leaf No. 34)

इति श्रीमत्सन्ततसन्तन्यमानश्येनकूर्मषोडशाररथचक्राकारादिबहुविधगुणविराजिमानमाठाग्निविलसितप्रौढापरिमितमहाध्वरस्य श्रीशाहजिशरभजितुक्कोजिभोसलचोलमहीन्द्रेन्द्रामात्यधुरन्धरस्य श्रीमदानन्दरायविद्वत्सार्वभौमस्य पञ्चपुरुषीपोष्येण बाल्य एव तदयानिर्वर्तितापरिमितमहाग्निविजृम्भितवाजपेयादिप्रमुखमखसन्तर्पितशत(मख)प्रमुखबर्हिर्मुखेनापारपदवाक्यप्रमाणपारावारपारीणेनाग्रजन्मविश्वेश्वरवाजपेययाजितो लब्धविध्यावैशद्येन बोधायनश्रौतचन्द्रिकाकौशल्यप्रख्यापितसर्वपथीनप्रज्ञाविभवमहादेववाजपेययाजिसुतेन अन्नपूर्णागर्भजातेन स्वामिशैलवास्तव्येन वासुदेवदीक्षितविदुषा विरचितं बोधायनीयदर्शपूर्णमासप्रयोगरत्नं सम्पूर्णम् ॥

(1)* (Leaf No. 107)

इति श्रीमत्सन्ततसन्यमान + वासुदेवदीक्षितविरचितप्रयोगरत्नं

समाप्तम् ॥

Subject: Prayogaratna giving the following :—

1	दर्शपूर्णमासप्रयोगः	Leaf	1
2 a	आधानप्रयोगः	,,	34
b	अन्वारम्भणीया	,,	66
3	अग्निहोत्रप्रयोगः	,,	76
4	पशुबन्धप्रयोगः	,,	86—107

Remarks :—The Ms. is old and is in a fairly good condition.

॥ प्रयोगरत्नम् ॥

2621. PRAYOGARATNAM.

Burnell's Catalogue No. 3700. Page 24. Left column. Substance—Paper. Size—10×5 inches. Sheets—46. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—320. Author—Veṅkaṭeśvara Dīkṣita. Darśapūrṇamāsa only.

Beginning:

श्रीगणेशाय नमः ॥

विश्वेश्वरं नमस्कृत्य लक्ष्मीनारायणौ गुरू ।
वाणीं यज्ञेश्वराचार्यं दक्षिणामूर्तिमेव च ॥
बोधायनं भवस्वामिभाष्यकारं मुहुर्मुहुः ।
कण्ठपाठाय बालानां बोधायनमतानुगम् ॥
कर्मान्तद्वैधगृह्योक्तविशेषैः सहितं स्फुटम् ।

प्रयोगरत्नं तनुते वेङ्कटेश्वरदीक्षितः ॥

आमावास्येन वा पौर्णमासेन वा हविषा यक्ष्यमाणो भवति स पुरस्तादेव हविरातञ्चन उपकल्पयत एकाहेन वा द्व्हेन वा यथर्तुचन्द्रमसं वा निश्राय सम्पूर्णं वा विज्ञाय रात्रिसन्धिमत्पर्वाणे दिवा सन्धिमत्पर्व पूर्वेद्युर्वा सायाह्नसन्धिमद्वृद्ध(द्धि)मत्पर्वणि सोऽयमाहिताग्निरूपवसथीयेऽहन्पुरा प्रातराग्निहोत्रात्पिटकानुपसादयेदन्वाधानार्थान्। हुते प्रातराग्निहोत्रे व्रतोपायनीयपाचयीत(?)। तस्य ब्राह्मणं प्रतिपाद्याश्नीयात्सर्पिर्मिश्रं दधिमिश्रमक्षारलवणं सर्वमन्नदहः (?) कौशीधान्यं वर्जयेदन्यत्र बिलेभ्यः। पत्न्या एवोच्छिष्टं दद्यान्नास्त्रियमुपेयात्स यदिकेशश्मश्रुवापयिष्यमाणस्यात्केशश्मश्रूणि वापयित्वा लोमानि संहृत्य नखानि निकृन्तयीत। सपत्नीकस्तीर्थे स्नायादहतं वासः परिधाय नवनीतेनाभ्यञ्जीत मुखमग्रेऽनुलोममङ्गानि त्रैककुदेजान्येन वाञ्जनेनाञ्जीत (अ)थर्त्विग्भ्वेदकर्णानि प्रयोक्ष्यन्नादित एव तीर्थे स्नात्वोदेत्याहतं वासः परिधाय शुद्धोह वै शुचिः पूतो मेध्यो विपाप्मा ब्रह्मचारी सहकारिप्रत्यय आचतुर्थात्कर्मणोऽभिसमीक्ष्यमाणः प्राङ्मुखः प्रदक्षिणं यज्ञोपवीतमजिनं वासः सूत्रं वा धृत्वा दैवानि कर्माणि करोति ॥

End:

"वायो व्रतपत आदित्यव्रतपते व्रतानां व्रतपते व्रतमचारिषम्" इति पुनः परिषिञ्चति। अथोपोत्थाय यज्ञस्य पुनरालम्भं जपति। "यज्ञो बभूव स आबभूव स प्रजज्ञे स वावृधे स देवानामधिपतिर्बभूव सो अस्माꣳ अधिपतीन्करोतु वयꣳ

स्यामपतयोरयीणाम्" इति। अथ प्राङुत्क्रम्य जपति "गो-
मा॰ अग्ने विमा॰ अश्वी यज्ञो नृवत्सखा सदमिदप्रमृष्यः।
इडावा॰ एषो असुरप्रजावान् दीर्घो रयिः पृथुबुध्नः सभा-
वान्" इति। ब्राह्मणा॰ स्तर्पयत वा इति सम्प्रेष्यति। अन्नं
संस्कृत्य च दशावरान् ब्राह्मणान् भोजयति। यथोपयादे-
वाग्नेर्याभिरग्नीन् प्रदक्षिणीकुर्यात्सन्तिष्ठत आमावास्यं वा
पौर्णमासं वा हविर्हविः ॥ २८ ॥

Colophon:

इति बोधायनदर्शपूर्णमासप्रयोगः सम्पूर्णः ॥

Subject:—Prayogaratna belonging to the Bodhāyana school of the Black Yajur Veda giving the prayoga details of the Darśapūrṇamāsa sacrifice.

Remarks:—The Ms. is in very good condition.

॥ प्रयोगरत्नम् ॥

2622. PRAYOGARATNAM.

J. L. Collection No. 264. Substance—Paper. Size—10×4 inches. Sheets—50. Lines—6 to a Page. Script—Devanāgarī. No. of Granthas—550 Author—Veṅkaṭeśvaradīkṣita.

Beginning, end, colophon and subject—Same as No. 2621.

Remarks:—The Ms. is in a decaying condition. A division of the text into 27 Khaṇḍas is given in this Ms. On the title page is given 'अग्निचिद्गङ्गाधरदीक्षितानामिदं पुस्तकम्। i.e., the Ms. originally belonged to Agnicit Gaṅgādharadīkṣita.

॥ सामप्रयोगवृत्तिः ॥

2623. SĀMAPRAYOGAVṚTTIḤ.

Burnell's Catalogue No. 9117. Page 25. Left column. Substance—Palm Leaf. Size —16 × 1¼ inches. Leaves—160. Lines—7 or 10 to a Page. Script—Grantha. No. of Granthas—6400. Author—Candraśekharabhaṭṭārya. Incomplete.

Beginning:

.....

.....वरं ख्यातं भृगुर्जैमिनिः ॥

तत्सूत्रं तन्त्रा.....र्थं ग्रन्थञ्चालोच्य शक्तितः ।

तदर्थं ग्रथ्यतेऽर्थोयं मया मत्तोऽपि ये धियः ॥

सूत्रकल्प..... ।

.....तैः

पठ्यते ह्यवयवैस्त्रिभिर्य... ।

यज्ञशास्त्रमिदमत्र वर्ण्यते

कल्पगोचरमिदं मयाधुना ॥

प्रकृतिर्विकृतिश्चेति द्वे अग्न्याद्योभयात्मिकाः ।

.....दाभि तैः प्रकृत्यादितत्त्ववत् ॥

धर्मं ददाति योऽन्यस्मै (नाद)त्ते स्वयमन्यतः ।

प्रकृतिः सा भवेद्यज्ञ एकत्रिंशद्विजो यथा ॥

ददाति धर्मानन्यस्मै कुतश्चित्स्वय..... ।

..... चोभयात्मासौ द्वादशाहो यथैषनः ।

योय..... न्यस..... ॥

.....रवेदुपश्रुतो यथा ।
अव्यक्तचोदनाक् ..... ॥
आज्यादेर्देवतादीनां द्रव्यादीनाञ्च काङ्क्षणात् ।
प्रथमे तिस्र आज्यानि ज्योतिष्टोमं व्यपेक्षते ॥
विच्यते.....भो यन्ती नानास्मृतिरतसोय (?)
.....स्यचान्वयात् ॥
अव्यक्तचोदनारूपात्तदीयाङ्गसमत्वे च ज्योतिष्टोम एव गवामयनस्यापि प्रकृतिः यथा बृहत्प्रधानस्येत्यत्र प्रत्यक्षव .....।
स्तोमपृष्ठगुणाः संस्था सव्यानामृषिदेवताः ।
काम इत्यन्वयैश्चैषा सामानि विकृतीरियुः ॥
प्रेतनादितिसौ..... ।
आशुभार्गवमायाता रक्षप्रैगुणसमन्वयात् ॥
संस्था त्वयातिचातिरात्रे तृतीयेऽहनि नानदी ।
.....तिरादिषु सङ्ख्यया ॥
ऋषभः पावमानस्य वृषभो नाम बद्धतः ।
ऋष्यन्वयामनुस्तोमे मानवद्वयमागतम् ॥
अग्निष्टुत्यश्विदैवत्या ऋचोदेव...योगतः ।
कामेन वाजपेयस्य त्रीण्य...युः ॥
इति साम्नां विकारेषु प्रोक्ता वृत्तौ नवान्वयाः ।
एकाहाः प्रथमं पश्चादहीनाश्च ततः परम् ॥
सत्राणि चैवमस्माभिः प्रदर्श्यन्ते क्रमान्मखाः ।

तत्र गवामयनस्य द्वादशाहः प्रकृतिः ॥

End :

एकपदानां यथा । इन्द्रो विश्वस्येति पूर्वस्य राजराजतीति परस्य पञ्चमषष्ठे इमं वर्षाणमिति पञ्चमादिषट्चतुर्भिरेन्द्रायाभीति षट्पदस्य च चतुर्थपादे नवाक्षरः प्रतिहारः अस्तु श्रौ(ष)डिति च । अग्निहोतारमिति द्वितीयस्य चतुर्थपञ्चमयोरन्यतरत् प्रतिहारः । अग्निं होतारमिति प्रथमस्य चतुर्थपदम् । अयारुचेति तृतीयस्य चतुर्थषष्ठसप्तमेष्वादितश्चत्वारि चत्वारीति पुनश्च ग्रन्थः । गायत्र्यादीनां षण्णामुत्तमपदादौ प्रतिहारः । द्वैपदानामुत्तमस्य पदादौ वा मध्ये वा यथायोगम् । एकपदानां मध्यम एव अतिजगतिप्रभृतीनां वरीयसाञ्चतुर्थे पञ्चमे वा । अन्येषु मनवशात् गानवशाच्च नियम्यतेति । एवं साम्नां भक्तयश्च प्रायशो दर्शिता इति ॥

Colophon :

एषाचार्यभवत्रातग्रन्थब्राह्मणवीक्षणात् ।
चन्द्रशेखरभट्टार्यपञ्चाग्नेरभवत्कृतिः ॥

एकाहादि सहस्राब्दसत्रपर्यन्तयाजिनः ।
सुकरं वीक्षणाद्यस्याः सादृश्यविनियोजनम् ॥

प्रतीतेरवधानस्य बाहुश्रुत्यस्य वा मम ।
अभद्यद(?)सम्यक्त्वमार्यैः क्षन्तव्यमत्र तत् ॥

अक्षरं यत्परिभ्रष्टं मात्राहीनञ्च यद्भवेत् ।
क्षन्तुमर्हन्ति विद्वांसः कस्य नास्ति व्यतिक्रमः ॥

॥ प्रयोगवृत्तिः समाप्ता ॥

Subject: Sāmaprayogavṛtti giving the details of Sāmans in Soma sacrifices, as given in the side-margin of this Ms.:—

1	कृष्टस्वरविचारः	Leaf	8
2	मात्रालक्षणम्	,,	9
3	पञ्चभक्तिनिदानम्	,,	9
4	भक्तिविभागः	,,	10
5	गायत्रसाम्नः भक्तिः	,,	15
6	छन्दोविचारः	,,	16
7	क्रमविचारः	,,	24
8	विकृतिभेदाः	,,	27
9	व्योम्नः	,,	30
10	वलभित्	,,	,,
11	उद्भित्	,,	31
12	प्रतिनाजित्	,,	,,
13	विराट्स्वाराज	,,	34
14	ज्येष्ठयज्ञः	,,	,,
15	अपचितेः	,,	35
16	विनुक्तेः	,,	37
17	मनुस्तोमः	,,	,,
18	आप्तोर्यामः	,,	39
19	प्रतिहारविभागः	,,	41
20	गोसवः	,,	45
21	बृहस्पतिसवः	,,	48

22	इन्द्राग्न्योः कुलायः	Leaf	48
23	इन्द्रस्तोमः	,,	49
24	विघनस्य	,,	,,
25	वैश्वदेवस्य	,,	52
26	उपहव्यस्य	,,	,,
27	चित्तिस्तोमस्य	,,	54
28	राशेः	,,	55
29	मरायस्व	,,	,,
30	इन्द्रस्तोमस्य	,,	57
31	विघनस्य	,,	58
32	उपहव्यस्य	,,	60
33	मनुस्तोमस्य	,,	
34	उत्तरमनुस्तोमस्य		
35	गायत्रस्य		
36	आपूर्वस्य	,,	69
37	पञ्चशरदीयस्य	,,	
38	अभिजिदतिरात्रस्य	,,	69
39	विश्वजितः	,,	70
40	सर्वपृष्ठस्य	,,	
41	परिराध्रपृष्ठस्य	,,	73
42	वाजपेयस्य	,,	74
43	दशपेयस्य	,,	76
44	केशवनीयस्य	,,	77
45	व्युष्टिद्विरात्रस्य	,,	,,

46	क्षेत्रधृतेः	Leaf	79
47	वसूनामग्निष्टोमः	,,	,,
48	रुद्राणामग्निष्टोमः	,,	,,
49	आदित्यानामग्निष्टोमः	,,	80
50	अङ्गिरसामग्निष्टोमः	,,	,,
51	मरुतामग्निष्टोमः	,,	,,
52	विश्वेषां देवानामग्निष्टोमः	,,	81
53	ऋतुष्टोमः	,,	82
54	पञ्चकस्योत्तरस्य	,,	,,
55	ऋतनिधनस्य	,,	,,
56	वसिष्ठस्याग्निष्टोमस्य	,,	84
57	भारद्वाजस्याग्निष्टोमस्य	,,	,,
58	जामदग्नेर्व्रतस्य	,,	85
59	गौतमस्याग्निष्टोमस्य	,,	,,
60	विश्वामित्रस्याग्निष्टोमस्य	,,	86
61	अगस्त्यस्याग्निष्टोमस्य	,,	,,
62	व्रात्यस्तोमस्य	,,	87
63	कनिष्ठव्रात्यानामग्निष्टोमस्य	,,	88
64	शाण्डिल्याग्निष्टोमस्य	,,	,,
65	शुनव्रात्यानाम्	,,	89
66	सजिह्वव्रात्यानाम्	,,	,,
67	सजिह्वस्तोमस्य	,,	90
68	चातुर्मास्यस्य	,,	,,
69	अभिप्रतरणीयस्य	,,	95

70	आयुरतिरात्रस्य	Leaf	95
71	पुत्रकामाग्निष्टोमस्य	,,	96
72	पराकस्य	,,	,,
73	गर्गत्रिरात्रस्य	,,	,,
	प्रथमपर्यायसमाप्तिः		
74	अश्वमेधस्य		
	प्रातःसवनम्	,,	104
	अश्वमेधभेदाः	,,	,,
	चतूरात्रम्	,,	,,
	ऋषीणाञ्च त्रिरात्रम्	,,	107
	सव्जनीयसंज्ञकस्य	,,	109
	पञ्चरात्रम्	,,	,,
	त्रिवृदग्निष्टोमः	,,	114
	पौण्डरीकम्	,,	119
	निर्ह्रासपक्षः	,,	121
	छन्दोमत्रिरात्रम्	,,	,,
	उदयनीतोऽतिरात्रम्	,,	127
	संज्ञाकल्पे चतुर्थखण्डसमाप्तिः	,,	130
	महाव्रतम्	,,	134
	अभिजित्	,,	,,
	गोयुषी	,,	,,
	वैश्वानरः	,,	,,
	प्रायश्चित्तसामविनियोगसमाप्तिः	,,	146

Remarks:—The Ms. is in a decaying condition. The other work contained herein is Pratihārasūtra Bhāṣyam.

॥ आपस्तम्बसूत्रध्वनितार्थकारिका ॥

2624. ĀPASTAMBASŪTRADHVANITĀRTHA-KĀRIKĀ.

Burnell's Catalogue No. 9185. Page 17. Right column. Substance—Palm leaf. Size—15⅛ × 1¼ inches. Leaves—18. Lines—9 to a Page. Script—Grantha. No. of Granthas—550. Author—Bhāskaramiśra. Somayāga—Three Kāṇḍas only.

Beginning:

शुक्लाम्बरधरं + शान्तये ॥

श्रियं वागीश्वरीं देवीं संप्रणम्य विनायकम् ।
गुरूंश्च सोमयागस्य प्रयोगः प्रवितन्यते ॥

तत्राधिकारकालादि प्रथमं प्रतिपाद्यते ।
सूत्रान्तरतमं वक्ष्ये सोपयोगं क्वचित्क्वचित् ॥

प्रसङ्गादग्निहोत्रेष्टिपश्वाधानोपयोगि यत् ।
तत्रापि लेशतः किञ्चित्प्रवक्ष्ये तत्र तत्र च ॥

अधिकारास्तयोर्नित्यकाम्यनैमित्तिकत्वतः ।
ते च श्रुतार्थवादेन कल्पत्वेन त्रिधा पुनः ॥

आधानं नित्यमेवेष्टं पितृयज्ञोऽपि तादृशः ।
कैश्चिन्मीमांसकैः काम्यः पितृयज्ञो निरूपितः ॥

पितृयज्ञस्य चाङ्गत्वमापस्तम्बेन दूषितम् ।

साधितश्च भरद्वाजसूत्रभाष्यकृता श्रुतेः ॥

आधानस्यापि काम्यत्वं बोधायनमताद्भवेत् ।
सर्वकामार्थमाधानमिति तेन निरूपितम् ॥

द्विप्रकाराधिकाराणि कर्माण्यन्यानि कानि चित् ।
ज्योतिष्टोमो निरूढश्च पशुस्सौत्रामणी तथा ॥

चातुर्मास्यानि दर्शश्च पूर्णमासोऽग्निहोत्रकम् ।
वाजपेय इतीमे स्युर्नित्याः काम्या इति द्विधा ॥

End:

अनेकाचार्यसिद्धान्ताः सौकर्याच्च निरूपिताः ।
देशकालवयोवस्थाशक्तिभेदाद्व्यवस्थिताः ॥

पुनराधिप्रसङ्गेन किञ्चिदत्र निरूपणम् ।
प्रायश्चित्तान्तरं वक्ष्ये स्वस्थाने बहुविस्तरम् ॥

अधिकारः प्रतिनिधिः पुनराधिरिति त्रयम् ।
निरूपितं विशेषेण त्वन्यद्ग्रन्थान्तरे भवेत् ।
त्रिकाण्डमण्डनमिति कर्तृद्वाराभिधानधीः ॥

Colophon:

इति पदवाक्यप्रमाणज्ञश्रीकुमारस्वामिसुतत्रिकाण्डमण्डनभास्कर-
मिश्रसोमयाजिकृतायामापस्तम्बसूत्रध्वनितार्थकारिकायां पुनराधानप्रकरणं तृतीयं काण्डम् ॥

हरिः ॐ ; शुभमस्तु ॥

(Leaf 7)

इति श्रीविद्यामदमत्ततत्तद्वादीन्द्रमतङ्गजविदारणैकपञ्चाननस्य श्रीकु-
मारस्वामिसुतत्रिकाण्डमण्डनभास्करमिश्रसोमयाजिनः कृ-
तावापस्तम्बसूत्रध्वनितार्थकारिकासु सोमयागोपोद्घातेऽ-

धिकारिनिरूपणम् ॥

Subject : Āpastambasūtradhvanitārthakārikā—dealing with the details of the Somayāga. 1-3 Kāṇḍas. 1-537 Verses.

1	अधिकारिनिरूपणम्	1—187 Verses
2	प्रतिनिधिनिरूपणम्	1—210 ,,
3	पुनराधानप्रकरणम्	1—136 ,,

Remarks :—The Ms. is in a fairly good condition. The author of this prayoga tract is Trikāṇḍamaṇḍana Bhāskaramiśra Somayājin who is the son of Kumārasvāmin.

॥ आपस्तम्बसूत्रध्वनितार्थकारिका ॥

2625. ĀPASTAMBASŪTRADHVANITĀRTHA-KĀRIKĀ.

Burnell's Catalogue No. 3867. Page 18. Left column. Substance—Paper. Size—11 × 4⅜ inches. Sheets—17. Lines—13 to a Page. Script—Devanāgarī. No. of Granthas—550. Author—Bhāskaramiśra. Somayāga—Three Kāṇḍas only.

Beginning, end, colophon and subject—Same as No. 2624.

Remarks :—The Ms. is in good condition.

॥ आपस्तम्बसूत्रध्वनितार्थकारिका ॥

2626. ĀPASTAMBASŪTRADHVANITĀRTHA-KĀRIKĀ.

Burnell's Catalogue No. 3865. Page 18. Left column.

Substance—Paper. Size—9⅞×4⅜ inches. Sheets—14. Lines—8 or 9 to a Page. Script—Devanāgarī. No. of Granthas—190. Author—Bhāskaramiśra. Somayāga—first Kāṇḍa only.

Beginning:—Same as No. 2624.

End

दैवात्सोमेन नैवेष्टं प्राग्वसन्तान्यपर्वणः ।
श्लिष्टं पर्वैकमेवात्र तथापि मलदूषितम् ॥ १८५ ॥
तत्र सोमसखो नैव कार्यो नित्योऽपि सन्नयम् ।
यागलोपप्रसक्तावप्युदक्यादि मले यथा ॥ १८६ ॥
एवमुद्देशतः सारमधिकारस्य भाषितम् ।
विचिन्त्य कथयिष्यामि तत्तत्प्रकरणे स्फुटम् ॥ १८७ ॥

Colophon :

इति वादिघटमुद्गरकुठारश्रीकुमारस्वामिसूरिसुतत्रिकाण्डमण्डन-भास्करमिश्रसोमयाजिकृतायस्तम्बसूत्रध्वनितार्थकारिकासु सोमयागोपोद्घातेऽधिकारनिरूपणम् ॥

विद्वत्प्रभुवरश्रीमद्विनायकतनूभुवः ।
प्रभोर्यसन्तरायस्य ग्रन्थ एष प्रवर्धताम् ॥

Subject : Āpastambasūtradhvanitārthakārikā. Somayāga. First Kāṇḍa—Adhīkāranirūpaṇam.

Remarks: —The Ms. is in a very good condition.

॥ आपस्तम्बसूत्रध्वनितार्थकारिका ॥

2627. ĀPASTAMBASŪTRADHVANITĀRTHA-KĀRIKĀ.

Burnell's Catalogue No. 3866. Page 18. Left column.

Substance—Paper. Size—9⅞ × 4⅞ inches. Sheets—17. Lines—8 or 9 to a Page. Script—Devanāgarī. No. of Granthas—215. Author—Bhāskaramiśra. Somayāga —second Kāṇḍa only.

Beginning :

श्रीगणेशाय नमः ॥

त्रिकाण्डमण्डनद्वितीय० ॥

शिष्टस्याभावतस्तुल्यं द्रव्यं प्रतिनिधीयते ।
यावद्यावत्सुसदृशं तत्तदेव हि गृह्यते ॥

काम्ये प्रतिनिधिर्नास्ति नित्यनैमित्तिके हि सः ।
काम्येऽप्युपक्रमादूर्ध्वमन्ये प्रतिनिधिं विदुः ॥

न स्यात्प्रतिनिधिर्मन्त्रे देवेऽग्नौ कर्मणीश्वरे ।
न च प्रतिनिधिर्देशकालयोरित्यथापरे ॥

End:

आहिताग्निः कदाचित्तु कृष्णपक्षे मृतो यदि ।
तदा शेषाहुतीः सर्वा जुहोतीत्याश्वलायनः ॥

अन्ये तदैव दर्शेष्टिं कुर्युः कृष्णे मृतस्य तु ।
शुक्लपक्षे निशि प्रेतस्येच्छन्ति प्रातराहुतिम् ।
एवं प्रतिनिधिप्रोक्तस्तत्कार्ये च विधिः पृथक् ॥ २१० ॥

अवशिष्टोऽत्र यः कश्चित् स्वे स्वे स्थाने वदामि ते ।

Colophon:

इति त्रिकाण्डमण्डनभास्करसोमयाजिनिर्मिते प्रतिनिधिनिरूपणम् ॥

Subject: Āpastambasūtradhvanitārthakārikā Somayāga Second Kāṇḍa. 1-210 Verses.

Remarks:—The Ms. is in a very good condition. On the title

page is given :—

विद्वत्प्रभुवरश्रीमद्विनायकतनूभुवः ।
प्रभोर्यसन्तरायस्य ग्रन्थ एष प्रवर्धताम् ॥

i.e. the Ms. originally belonged to Yasantarāya Prabhu, son of Vināyaka Prabhu.

॥ आपस्तम्बसूत्रध्वनितार्थकारिका ॥

2628. ĀPASTAMBASŪTRADHVANITĀRTHA-KĀRIKĀ.

Burnell's Catalogue No. 3868. Page 18. Left column. Substance—Paper. Size—9½ × 1⅝ inches. Sheets—13. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—145. Author—Bhāskaramiśra. Somayāga—third Kāṇḍa only.

Beginning:

श्रीवेदव्यासाय नमः ॥

कामे निमित्तयोगे वा पुनराधेयमिष्यते ।
निमित्तेषु यथा योगमाधानमथ वा भवेत् ॥
तत्र येषु निमित्तेषु शृङ्गग्राहिकया विधिः ।
तत्रैव पुनराधेयमन्यथाऽधानमिष्यते ॥

End—Same as No. 2624.

Colophon:

इति पुनराधानप्रकरणम् ॥

Subject: Āpastambasūtradhvanitārthakārikā. Third Kāṇḍa. 1-136 Verses.

Remarks:—The Ms. is in a very good condition. On the title page is given

विद्वत्प्रभुवर + प्रवर्धताम

i.e. the Ms. originally belonged to Yasantarāya Prabhu son of Vināyaka Prabhu. After the colophon of this Ms., 32 verses are given :

अथ कस्यचित् कथिकस्य नानाविधानि वैकल्पिकानि तद्यथा—

सकृत्करणमिच्छन्ति याकयज्ञेषु केचन ।
आवृत्तिं केचिदिच्छन्ति तत्रावृत्तिस्तु सम्मता ॥ १ ॥

* * * *

रूपं कालोऽथनिर्वापो देवताश्रवणं तथा ।
आदौ ये विधृताः पक्षास्त एवस्युस्तदैव हि ॥ ३२ ॥

एतच्चमण्डलविषयं तत्परिशिष्टविषयम् ।

इति कारिकायां त्रिकाण्डमण्डनतृतीयकाण्डं समाप्तम् ॥

According to this Ms., these 32 verses form the Pariśiṣṭa (supplement) to the third Kāṇḍa of आपस्तम्बध्वनितार्थकारिका.

॥ आपस्तम्बश्रौतप्रयोगकारिका ॥

2629. ĀPASTAMBAŚRAUTAPRAYOGA-KĀRIKĀ.

Burnell's Catalogue No. 3864. Page 18. Left column. Substance—Paper. Size—10 × 4¾ inches. Sheets—29. Lines—9 or 10 to a Page. Script—Devanāgarī. No. of Granthas— 50. Author—Vāsudevadīkṣita. Agniṣṭoma only.

Beginning :

सङ्कल्प्य विश्वद्दृणुयात्प्रवाक-
मृत्विग्व्रतीस्यान्मधुपर्ककर्म ।
सक्षेदमुक्त्वा तु विधाय नान्दी-
मारोप्य वास्तोष्पतिहोमवर्जम् ॥ १ ॥

उक्त्वा विशेदेदमगन्मशाला-
मुपावरोह्यावसिताहुतिर्ना ।
ततः परं संभरति प्रवर्ग्यं
केचित्तु सक्षेदमनन्तरं ग्रहे ॥ २ ॥

द्रव्यस्य निर्देशविधिर्विहित्य
जुहोति संभारयजूंषि तत्र ।
निवेदनं ते पय ओदनन्तु
सोमाय राज्ञे नम इत्युदीर्य ॥ ३ ॥

अत्रैव वा सम्भरति प्रवर्ग्यं
दीक्षोत्तरं वा क्रयणाहतः प्राक् ।
आतिथ्ययेष्ट्रेति तु केचिदाहुः
सर्वत्र सूत्रोदितकाल इष्टः ॥ ४ ॥

End:

आमिक्षावेदमाधायातीमोक्षजप इष्यते ।
अतीमोक्षजपान्ते तु यज्ञशंवृष्टिरित्यपि ॥ ४५ ॥

ब्राह्मणांस्तर्पयित्वै समारोप्य प्रयाति च ।
इदं श्रेयश्च निर्मथ्यं विहृत्याहवनीयकम् ॥ ४६ ॥

हुत्वा पूर्णाहुतिं सायमग्निहोत्रन्तु हूयते ।
यत्र कालातिक्रमेऽपि न प्रायश्चित्तमिष्यते ॥ ४७ ॥

नैवारम्भोग्निहोत्रस्य रात्राविति तु केचन ।
रात्रावपि तदारम्भसंप्रदायस्तु वक्ष्यते ॥ ४८ ॥

Colophon :

इति श्रीवासुदेवदीक्षितविरचिताः आपस्तम्बसोमकारिकाः
समाप्ताः ॥ कारिका ४४८॥

Subject : Āpastambaśrautaprayogakārikā, a prayoga tract in 448 verses dealing with the Agniṣṭoma Soma sacrifice, according to the Āpastamba school of the Black Yajur-Veda.

Remarks :—The Ms. is in good condition.

॥ आपस्तम्बश्रौतप्रयोगकारिका ॥

2630. ĀPASTAMBAŚRAUTAPRAYOGA-KĀRIKĀ.

Burnell's Catalogue No. 3863. Page 18. Left column. Substance—Paper. Size—10 × 4¾ inches. Sheets—8. Lines—9 or 10 to a Page. Script—Devanāgarī. No. of Granthas—105. Author—Vāsudevadīkṣita. Paśubandha only.

Beginning :

श्रीगणेशाय नमः ॥
आपस्तम्बपशुकारिका ॥

पर्वणोः पशुबन्धः स्यात्सद्यस्कालोऽह्नोऽपि वा ।
अहत्वे तु चतुर्दश्यां सद्यस्काले तु पर्वणि ॥ १ ॥
निरूढपशुबन्धेन यक्ष्य इत्यागुरं वदेत् ।
अयन्त इत्यथारण्योरारोप्योदवसाय च ॥ २ ॥

उपावरो हेति जपेन्मथिते जात एव तु ।
वस्तोष्पतीय्यावसितहौमौस्यातां न कर्मणाम् ॥ ३ ॥

End :

ब्रह्मप्रतिष्ठेत्यादीनि चित्तान्प्राणाय च(?) ध्रुवाम् ।
तया प्रतिविभज्याथस्यात्समिष्टे यजुस्त्रयम् ॥ २ ॥
अभिस्त्रीणी... यं देवा शूलचर्याग्न्युपस्थितेः ।
ब्रह्मा तु शूलचर्यान्ते विनिष्क्रामत्ययाडिति ॥
न विष्णोरग्निनेत्यादि सिद्धमागोमती जपात् ॥ ३ ॥
गोमान्नमस्वरूच्यश्च यज्ञसंवृष्टिरित्यपि ।
ब्राह्मणांस्तर्पयतवै स्वस्थानं प्रतियात्यथ ॥ ५ ॥

Colophon :

इति श्रीवासुदेवदीक्षितकृता आपस्तम्बपशुकारिका समाप्ता ॥
आहत्यकारिका ॥ १०५ ॥

Subject : Āpastambaśrautaprayogakārikā—a prayoga tract in 105 verses dealing with the Paśubandha sacrifice, according to the Āpastamba school of the Black Yajurveda.

Remarks:—The Ms. is in good condition.

॥ बोधायनश्रौतप्रयोगकारिका ॥

2631. BODHĀYANAŚRAUTAPRAYOGA-KĀRIKĀ.

Burnell's Catalogue No. 3721. Page 24. Left column.

Substance—Paper. Size—10¾ × 4¼ inches. Sheets—13. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—33½. Author—Gopāla. Complete.

Beginning:

षण्मुखाय नमस्तस्मै रुद्राणीप्रियसूनवे ।
निहितः स्वयमातृष्णः काण्वोभूद्येन सूत्रकृत् ॥

कल्पामृतं क्षितिसुरप्रकराय योदा-
द्वादाम्बुराशिमधिगम्य निजप्रभावात् ।
बोधायनाय मुनिवन्दितपादपद्म-
द्वन्द्वाय कण्वतनयाय नमोऽस्तु तस्मै ॥ २ ॥

श्रियं नः श्रौतकल्पानां प्रादुर्भूताय विष्णवे ।
तत्तत्कालं पुनर्दातुं नमो बोधायनात्मने ॥ ३ ॥

मुनिं बोधायनं वन्दे वेदतत्त्वार्थदर्शिनम् ।
कामदं व्योमदं कान्तं कल्पं कल्पद्रुमं यथा ॥ ४ ॥

आकल्पं कल्पयामास वन्दे बोधायनं मुनिम् ।
पक्षादौ पक्षयोः सन्धेः सन्निकृष्टतरे दिवा ॥ ५ ॥

पौर्णमास्याः प्रधानानि कर्तव्यान्यत्र नो गुरुः ।
यागान्वाधानयोर्मध्ये पर्वसन्ध्ये च पक्षयोः ॥ ६ ॥

End:

सोमान्नत्वे भवेदग्निष्टोमः प्रकृतिरेवतु ।
पञ्चन्तपक्ष ऐन्द्राग्नो निरूढश्चाङ्ग एव सः ॥

स वनेष्वन्तपक्षेस्यादाग्नेयोष्टाकपालकः ।
एकादशकपालैन्द्रः स्याद्वादशकपालकम् ॥

पाशुके विततेतन्त्रे होमकाल उपस्थिते ।
अपरे तु विहारे सा तत्रैवोत्तरवेदिकम् ॥

सद्यस्कालपशौ पक्षे होमकाल उपस्थिते ।
समाप्यैव तु होतव्यं काल एव जुहोति वा ॥

Colophon: (Sheet 6).

इति दर्शपूर्णमासपिण्डपितृयज्ञाधानाग्निहोत्रारम्भणीयाग्निनाशनिमित्त गोपालकारिकाः समाप्ताः ॥

इति गोपालकृताश्चातुर्मास्य कारिकाः ॥

Subject:—Bodhāyanaśrautakārikā—(Gopālakārikā) containing the prayogas of Darśapūrṇamāsa, Ādhāna, Piṇḍapitṛyajña, Agnihotra, Anvārambhaṇīya and Cāturmāsya sacrifices.

Remarks:—The Ms. is in a fairly good condition. On the title page is given 'श्रीबाबाजीनायकपुण्डयोपनाम्नाम्' श्रीशमजीनायकपुण्डयोपनाम्नाम्
i. e. it originally belonged to both Śāmāji Nāyaka and Bābāji Nāyaka.

॥ बोधायनश्रौतप्रयोगकारिका ॥

2632. BODHĀYANAŚRAUTAPRAYOGA-KĀRIKĀ.

J. L. Collection No. 265. Substance—Paper. Size—9¾×4½ inches. Sheets—5. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—100. Author—Gopāla. Darśapūrṇamāsa, Piṇḍapitṛyajña and Agnyāyatana only.

Beginning—Same as No. 2631.

End:

मध्येन दक्षिणं पार्श्वं परिलिख्य तथोत्तरम् ।

एवं पुरस्तात्पश्चाच्च वेदिः पार्श्वेण परियम् ॥

यदि भूमिरनुस्नुः स्याद्रज्जुर्द्वादशधा कृता ।
वर्धयेत्तां त्रयोदश्यां तयाचान्ते बहिःक्रिया ॥

इति सम्पूर्णं (र्णा) ॥

अथास्यैतत्पुरस्तादेव० मध्येगार्ह० अथाग्न्या०यतनम् । इष्टदेवो प्राचीं साधयित्वा दीर्घचतुरस्रंसमचतुरस्रं वा प्राग्दक्षिणद्वारद्वययुक्तमग्न्यागारं परिकल्प्य तन्मध्ये गार्हपत्यस्यायतनम् । पुरस्ताद्वाद० चक्षुर्नि० प्रक्रममाह द्विपदस्त्रिपदो वा प्रक्रमः ॥

❀ ❀ ❀ ❀

एवं वेदिं निधाय सर्वतः सन्नमयेत् । दक्षिणश्रोणां सशङ्कोरञ्जसा दक्षिणतस्यान्तराळद्वादशांशेन शङ्कुं निहन्यात् । तयोरातुकत्रयोदशांशाधिकामुभयतः पाशां रज्जुं प्रतिमुच्य तया दक्षिणं पार्श्वं परिलिखेत् । एवं सतः प्राक्तान्यङ्गुळाधिका प्राक्तयोरेव प्रतिमुच्य परिलिखेदित्यपीति केचित् ॥

Colophon:

इयं दार्शपौर्णमासिका वेदिः ॥

Subject: Bodhāyanaśrautaprayogakārikā—popularly known as Gopālakārikā, a prayoga tract in verses based on the Bodhāyanaśrautasūtras, containing the prayogas of (1) Darśapūrṇamāsa (2) Piṇḍapitṛyajña and (3) Agnyāyatana.

Remarks:—The Ms. is in a fairly good condition. The last section

of this Ms. contains two different versions, one in verse and other in prose.

॥ बोधायनश्रौतप्रयोगकारिका ॥

2633. BODHĀYANAŚRAUTAPRAYOGA-KĀRIKĀ.

J. L. Collection No. 266. Substance—Paper. Size—9½ × 4½ inches. Sheets—5. Lines—8 to 9 to a Page. Script—Devanāgarī. No. of Granthas—65. Author — Gopāla. Complete.

Beginning:

श्रीगणेशाय नमः ॥

अथ गोपालकारिका पशोः ॥

अयनादौ निरूढोऽयं नाभावेऽब्दमतिक्रमेत् ।
माघमासे धनिष्ठाभिरुत्तरे नेति भानुमान् ॥ १ ॥
श्रवणाश्लेषयोर्मध्ये दक्षिणेन निवर्तते ।
साम्प्रतं रविरप्राप्य मृगं कर्कटकं किल ॥ २ ॥
निवृत्तेरन्तरं कुर्यादामावास्यस्य वाथ वा ।
यत्पुण्यमिति नक्षत्रमनुकूलं यदात्मनः ॥ ३ ॥

End:

धातूनक्त्वा समिष्टाग्नीन् हुत्वा विष्णुक्रमादिकम् ।
तर्पणान्तमिहैव स्याच्छूलाद्यध्वर्युरन्ततः ॥
याजमानं कुसीदादि केचित्पूर्णाहुतिं विना ।
यद्वा विष्णुक्रमादर्वाक्कृत्वा यज्ञो बभूवतः ॥

शूलचर्या कुसीदादि दत्वा पूर्णाहुतौ वरम् ।
यज्ञो बभूव गोमत्यौ ततो ब्राह्मणतर्पणम् ॥

Colophon:

इति गोपालकृतपशुकारिका समाप्ता ॥

श्रीनृसिंहार्पणमस्तु ॥

Subject: Gopālakārikā—Paśukārikā only.

Remarks:—The Ms. is in good condition.

॥ बोधायनश्रौतप्रयोगकारिका ॥

2634. BODHĀYANAŚRAUTAPRAYOGA-KĀRIKĀ.

J. L. Collection No. 267. Substance—Paper. Size—$9\frac{3}{4} \times 4\frac{1}{4}$ inches. Sheets—12. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—317. Author—Gopāla. Complete.

Beginning:

श्रीगणेशाय नमः ॥

शुभमस्तु ॥

पक्षादौ पक्षयोः सन्धिः सन्निकृष्टतरं दिवा ।
पौर्णमास्यां प्रधानानि कर्तव्यान्यत्र नो गुरुः ॥ १ ॥
यागान्वाधानयोर्मध्ये पर्वसाध्वेव पक्षयोः ।
किन्तु सन्धेः प्रधानानां सन्निकृष्टोऽनपेक्षितः ॥ २ ॥
अन्यो दिवान्ते रात्र्यां वा प्रागेष्टि सन्धियागयोः ।
सन्निपातमतस्तेन कालहोमोऽप्यनादृतः ॥ ३ ॥

End:

वत्सापाकरणं तूष्णीं गृहमेधीयपङ्क्तये ।

अपूर्वत्वे प्रयोगोऽयं वृधानार्थं निवर्तते ॥ ६४ ॥

अङ्गार्थं क्रियते कार्यमुभयार्थं क्रियेति च ।
सायं हुते विहृत्यन्वाधानमुष्टिः सवेदकः ॥ ६५ ॥

पाणिमृष्ट्वा परिस्तीर्य स्फ्यहवन्यौ जुहूपभृत् ।
स्रुवं ध्यावामिडापात्रमाज्यस्थालीं सवेदकाम् ॥ ६६ ॥

अग्रं योक्त्रं च संसाद्य पवित्रान्तं समन्त्रकम् ।
तूष्णीं निरूप्य पात्राणां प्रोक्ष····· ··(॥ ६७)

Colophon : (Sheet No. 10).

इति पशुकारिका समाप्ता ॥

Subject : Bodhāyanaśrautaprayogakārikā — (Gopālakārikā.)

The Ms. contains पशुकारिका and चातुर्मास्यकारिका

Remarks :—The Ms. is in good condition. The Ms. abruptly breaks off in the middle of the 67th Kārikā of चातुर्मास्यकारिका.

॥ कारिकासन्धीकृतबोधायनश्रौतप्रयोगविवृतिः ॥

2635. KĀRIKĀSANDHĪKṚTABODHĀYANA-ŚRAUTAPRAYOGAVIVṚTIḤ.

J. L. Collection No. 268. Substance—Paper. Size—11⅓ × 3½ inches. Sheets—27. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—540. Author — Bālādīkṣita. Darśapūrṇamāsa only.

Beginning :

श्रीगणेशाय नमः ॥

निरुपमगुणवल्लीदेवसेनासनाथे
भुजबलहतदैत्यच्छत्रपद्मासुरेन्द्रे !

गिरिशगिरिदुहित्रोः प्रेमसर्वस्वपात्रे
भवतु मम कुमारे गाढमुद्दामभक्तिः ॥

कल्पामृतं क्षितिसुरप्रकराय योऽदात्
क्षीराम्बुराशिमधिमथ्य निजप्रभावात् ।
बोधायनाय मुनिवन्दितपादपद्म-
द्वन्द्वाय कण्वतनयाय नमोऽस्तु तस्मै ॥ २ ॥

साग्निभिः सप्त संस्थाभिस्तर्पितेन्दुशिखामणिम् ।
सुब्रह्मण्याभिधं वन्दे पितरं श्रौतसागरम् ॥ ३ ॥

श्रीवत्सान्वयवर्ति(वार्धि)कौस्तुभमणिर्विश्वेश्वराध्वर्यभू-
त्तस्याभूत्प्रथमः सुतः किल महादेवाध्वरीन्द्रः सुधीः ।
श्रीनारायणदीक्षितो यदनुजः तस्याभवन्सूनवः
चत्वारः पदवाक्यमाननिपुणाः वेदा हि मूर्ता इव ॥ ४ ॥

ज्यायान् विश्वेश्वराध्वर्यथ विदितयशा वासुदेवाध्वरीन्द्रः
ख्यातश्रीरामचन्द्राध्वरकृदथ ततः श्रीनिवासाध्वरीन्द्रः ।
तेषु ज्येष्ठस्य पुत्रो विरचितचयनानेकसंस्थाकसोम-
श्रीसुब्रह्मण्ययज्वा मम पितृचरणः सूत्रषट्कप्रवक्ता ॥ ५ ॥

श्रीबोधायनकल्पसूत्रसरणौ न्यायादिसिद्धानि त-
द्वृत्तोपालाध्वरिकारिका प्रकटितान्युक्तानि यानि स्फुटम् ।
अस्मत्तातकनिष्ठतातचरणैः श्रीवासुदेवाभिधै-
रप्येतानि च तत्र तत्र कलये सूत्रेषु यज्ञेश्वरः ॥ ६ ॥

नत्वा बोधायनमुनिमाज्ञां धृत्वा शिवाजिभूपस्य ।
श्रौतप्रयोगविवृतिः क्रियते बाळाख्ययज्वना सुधिया ॥ ७ ॥

अपामुपस्पर्शनमर्थसिद्धमुद्दिश्य यागं परिषेचनादि ।
मन्त्रप्रतीके सकलञ्च मन्त्रं द्रव्यादिसङ्कल्पमपि ब्रवीमि ॥ ८ ॥

कारिकास्थितमन्त्रञ्च कात्स्न्र्येनैव विलिख्यते ।
सन्तः प्रतीक्ष्य तदिदं मोदन्तां गतमत्सराः ॥ ९ ॥

आमावास्येन वा पौर्णमासेन वा हविषा यक्ष्यमाणो भवति । स पुरस्तादेव हविरातञ्चनमुपकल्पयत एकाहेन वा ह्यहेन वा यथर्तु अथ वै ब्राह्मणं भवति । दध्नातनक्ति सेन्द्रत्वायाग्निहोत्रोच्छेषणमभ्यातनक्ति "यज्ञस्य सन्तत्यै" इति । चन्द्रमसं वा निर्ज्ञाय संपूर्णं वा विज्ञाय ॥

पक्षादौ पक्षयोः सन्धेः सन्निकृष्टतरं दिवा ।
पौर्णमास्यां प्रधानानि कर्तव्यान्यत्र नो गुरुः ॥

यागान्वाधानयोर्मध्ये पर्वसाध्येव पक्षयोः ।
किन्तु सन्ध्ये प्रधानानां संनिकर्षोऽनपेक्षितः ॥

End:

अथैतेनैव यथेतमेत्य यजमानायतन उपविश्य तिरःपवित्रमय इत्यादि व्रतविसर्गः । अत्राचारिषं तदशकमिति विशेषः । पूर्ववत्त्यागाः । अथोपोत्थाय यज्ञस्य पुनरालम्भं जपति यज्ञो बभूव सः० रथीनामिति । अथ प्राङुत्क्रम्य गोमतीर्जपति गोमा॰ अग्ने० सभावान् इति । अथ ब्राह्मणा॰ स्तर्पयत वै इति संप्रेष्यति ।

दशौदना स्युरिष्टीनां पशौ तु शतमोदनाः ।
सहस्रमोदनाः सोम इत्याहुर्ब्रह्मतर्पणम् ॥

कर्मणां सांगतासिद्ध्यै जपेत्पुरुषसूक्त(क)म् ।

यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ॥
न्यूनं संपूर्णतां याति सद्यो वन्दे तमीश्वरम् ।
संतिष्ठत आमावास्यं वा पौर्णमासं वा हविर्हविः ॥
×३ यज्वाव्रतविसर्गात्प्रागुपवेषमथोत्करे ।
यं देवा इत्युपोदस्येत्प्रत्यञ्चं स्थूलदेशतः ॥
यं देवा मनुष्ये × × प्रवेषं० कुर्विंति × ॥

Colophon :

इति श्री कारिकासन्धीकृतं बोधायनदर्शपूर्णमाससूत्रं संपूर्णम् ॥

श्रीमत्प्रणतार्तिहरार्पणमस्तु ॥

Subject : Kārikāsandhīkṛtabodhāyanaśrautaprayogavivṛti — a prayoga treatise based on the Bodhāyanaśrautasūtras and their subsequent prayogakārikās—giving the details of the Darśapūrṇamāsa sacrifice.

Remarks :—The Ms. is in a fairly good condition. The author of this and the three following prayoga tracts is Bālādīkṣita otherwise known as Yajñeśvaradīkṣita, a resident of Sahajirājapuram or the modern Tiruvisanalloore near Kumbakonam in Tanjore District. See Remarks on Nos. 2063 and 2067. The indroductory verses in this Ms. give in detail the geneology of this author as the following table shows.

Viśveśvarādhvarin (ot Śrīvatsa family)

Mahādevavājapeyin	Nārāyaṇadīksita.

(4) Śrinivāsādhvarin.	(3) Rāmacandrādhvarin.	(2) Vāsudevādhvarin.	(1) Viśveśvarādhvarin.

Subrahmaṇyayajvān.

Bālādīkṣita.

॥ कारिकासन्धीकृतबोधायनप्रयोगविवृतिः ॥

2636. KĀRIKĀSANDHĪKṚTABODHĀYANA-PRAYOGAVIVṚTIḤ.

Burnell's Catalogue No. 3745. Page 24, Left column. Substance—Paper. Size—11⅜ × 5 inches. Sheets—82. Lines—10 or 11 to a Page. Script—Devanāgarī. No. of Granthas—1800. Author—Bālādīkṣita (Yajñadīkṣita) Darśapūrṇamāsa, Upavyāharaṇa and Ādhāna only.

Beginning—Same as No. 2655.

End:

'अन्वारम्भे याजमानमग्नाविष्णोऽस्तु वृत्रहा ।
सरस्वत्या वाचमन्नाद्यं पुषेयं सरस्वतः ॥
श्रद्धा मना भूयासं स्वाङ्गिनोन्नाद एव च ॥'

त्रिष्टुभौ संयाज्येन्वाहार्यमासाद्य मिथुनौ गावौ ददाति सन्तिष्ठत एषेष्टिः सपूर्णपात्रविष्णुक्रमानविसृजते व्रतम् ।
'कृत्वान्वारम्भणीयांश्च तेष्वेवाग्निषु पार्वणम् ।'
अथ पौर्णमासवैमृथाभ्यां यजते ।
'होत्रं तमथ वा सारस्वतान्तं वापि पर्वणि ।
कृत्वा प्रातः कृतान्तादि कुर्यादिष्टिद्वयं क्रमात् ॥
चातुर्होत्रादिसर्वञ्च प्रतिपद्येव वा भवेत् ।
तुल्योपवसथत्वं स्यात्सर्वेष्वेव चतुर्ष्वपि ।'
सन्तिष्ठतेऽग्याधेयं सन्तिष्ठतेऽग्न्याधेयम् ॥

Colophon:

इति श्रीशाहजीमहापुरवास्तव्येन बालादीक्षितविदुषा का-

रिकासन्धीकृतबोधायनाधानप्रयोगविवृतिः सम्पूर्णा ॥

Subject: Kārikāsandhīkṛtabodhāyanaśrautasūtraprayogavivṛti.

1	दर्शपूर्णमास	Page	1—49
2	उपव्याहरणम्	,,	49—54
3	आधानम्	,,	54—82

Remarks:—The Ms. is in good condition. In the beginning of this Ms. the seventh Sloka. 'नत्वा बोधायनमुनिं + सुधिया' is omitted. The following Stanza is added as the ninth.

'राजश्रीशरभावनीन्द्रवचसा नागेशयज्वाभिध-
श्रौढप्रार्थनयापि सङ्कलयतः कल्पोक्तिशेषं मम ।
दोषो यद्यपि नो भवेदथ पुनः स्याच्चेत्परामृश्य त-
न्निश्शेषं परिशोधयन्तु दयया सन्तो विदन्तोऽखिलम् ॥'

Dr. Burnell has observed on page 23 of his catalogue that No 3745 a contains 50 sheets and it is '(Bodhāyana) Upavyaharaṇaprayoga'; and again on page 24, he has added that No. 3745 b. contains 82 sheets and it is 'Various prayogas by Yajñadīkṣita. Evidently the whole Ms. contains 82 sheets only as described above and it is a prayoga by Bālā (yajña) dīkṣita on Darśapūrṇamāsa, Upavyāharaṇa and Ādhāna, as noted above.

॥ कारिकासन्धीकृतबोधायनश्रौतप्रयोगविवृतिः ॥

2637. KĀRIKĀSANDHĪKṚTABODHĀYANA-ŚRAUTAPRAYOGAVIVṚTIḤ.

Burnell's Catalogue No. 3716. Page 24. Left column.
Substance—Paper. Size—11½×5 inches. Sheets—25.

Lines—9 to a Page. Script—Devanāgarī. Nos of Granthas—525. Author—Bālādīkṣita. Paśubandha only.

Beginning :

पशुना यक्ष्यमाणो भवति + पृषदाज्यायदाधिहिरण्यमित्यथामावस्येन हविषेष्ट्या नक्षत्रे वा—

निरूढपशुबन्धोऽयं वत्सरस्य द्विरिष्यते ।
तत्रैकः पशुबन्धः स्यात्प्रवृत्ते मकरायने ॥ १ ॥

End :

पूर्णाहुतौ वरं ददाति धेनुवरं वा अनड्वरं वा दद्यादिति ह स्माह बोधायनः ।

वरे दत्ते भवेद्यज्ञो + यथा पूर्वमिहागतः ॥ १२ [५]
सन्तिष्ठते पशुबन्धः सन्तिष्ठते पशुबन्धः ॥

Colophon :

इति श्रीबोधायनकल्पसूत्र गोपालकारिकासहकृतपशुसूत्रं समाप्तम् ॥

Subject : Bodhāyanaśrautaprayogavivṛti — based on the Bodhāyanaśrautasūtras and Gopālakārikās thereon. 1-12 Kāṇḍas.

Remarks :—The Ms. is in good condition. On the title page is given 'बालादीक्षितकृतपशुबन्ध प्रयोगवृत्तिः' ॥

॥ कारिकासन्धीकृतबोधायनश्रौतप्रयोगविवृतिः ॥

2638. KĀRIKĀSANDHĪKṚTABODHĀYANA-ŚRAUTAPRAYOGAVIVṚTIḤ.

Burnell's Catalogue No. 3733. Page 24. Right column. Substance—Paper. Size—11½ × 5 inches. Sheets—62 (38-

99). Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—1350. Author—Bālādīkṣita. Agniṣṭoma only.

Beginning:

श्रीगणेशाय नमः ॥

हरिः ॐ अथातो महारात्र एव बुध्यन्ते ॥

'त्रिभागे पश्चिमे रात्रेस्तीर्थे न प्रविशन्त्यमी ।
नासंस्थि(स्थि)ते सदोतीयादर्वाग्वा दक्षिणायनात् ॥

सम्बोधयन्त्येतानृत्विजोऽध्वर्युं होतारं ब्रह्माणमुद्गातारं प्रतिप्रस्थातारं प्रस्तोतारं प्रशास्तारं ब्राह्मणाच्छंसिनमच्छावाकं नेष्टारं पोतारं सदस्यमुन्नेतारमाग्नीध्रं ग्रावस्तुतं सुब्रह्मण्यं प्रतिहर्तारं ये चान्ये परिकर्मिणो भवन्ति ते हस्तपादान्प्रक्षाल्याग्नीध्रे यजमानमुपसङ्गच्छन्तेऽथाध्वर्युर्हस्तौ सम्मृशते "कर्मणे वां देवेभ्यः शकेयम्" इति ॥

पाणी संमृश्य चाध्वर्युः प्रेष्येदुन्नेतरित्यथ ॥ १ ॥

End:

अथारण्योरग्नीन्समारोह्य "प्रत्यक्षतो वापि हरेच्च वह्नीन्तथैव वा निष्क्रमणे पुरापि" स्वान्यग्न्यायतनान्यध्यवसाय मथित्वाग्नीन्विहृत्य सायंप्रातरग्निहोत्रे प्रतिजुहोति ।

"होमातिपत्तौ प्रतिहोममेके उपक्रमेताप्यहुतं पुरा चेत् ।
आरम्भणीयाप्यकृता पुरा चेदाधानसोमे कुरुते समाप्ते ॥"

सन्तिष्ठतेऽग्निष्टोमः सन्तिष्ठतेऽग्निष्टोमः ॥ १० ॥

Colophon: (Sheet No. 67)

इति श्रीशाहजीमहाराजपुरवास्तव्येन बालादीक्षितकृतौ का-

रिकासन्धीकृतबोधायनाग्निष्टोमप्रयोगविवृतौ प्रातस्सवनं संपूर्णम् ॥

(Sheet No. 99)

इति श्रीशाहजीमहाराजपुरवास्तव्येन बालादीक्षितेन कारिकासन्धीकृतबोधायनकल्पसूत्रे अग्निष्टोमसूत्रं सम्पूर्णम् ॥

जयसंवत्सर श्रावणशुद्धैकादश्यां सम्पूर्णम ॥

Subject : Kārikāsandhīkṛtabodhāyanaśrautaprayogavivṛti—a prayoga tract based on the Bodhāyanaśrautasūtras and their Kārikās, giving the details of the Agniṣṭoma sacrifice.

Remarks :—The Ms. is in good condition.

॥ कारिकासन्धीकृतबोधायनश्रौतप्रयोगविवृतिः ॥

2639. KĀRIKĀSANDHĪKṚTABODHĀYANAŚRAUTAPRAYOGAVIVṚTIḤ.

Burnell's Catalogue No. 3741. Page 25. Right column. Substance—Paper. Size—11⅜×5½ inches. Sheets—97. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—2500. Author—Yajñeśvaradīkṣita. Mahāgnicayanaprayoga only.

Beginning :

श्रीमहागणपतये नमः ॥

साग्निभिः सोमसंस्थाभिस्तर्पितेन्दुशिखामणिम् ।
सुब्रह्मण्याभिधं वन्दे पितरं श्रौतसागरम् ॥ १ ॥
श्रीबोधायनकल्पसूत्रसरणौ न्यायादि सिद्धानि तत्
गोपालाध्वरिकारिकाप्रकटितान्युक्तानि यानि स्फुटम् ।

अस्मत्तातकनिष्ठतातचरणैः श्रीवासुदेवाभिधैर-
प्येतानि च तत्र तत्र कलये सूत्रेषु यज्ञेश्वरः ॥ २ ॥

हरिः ॐ ॥ उखाः सम्भरिष्यन्नुपकल्पयते ॥

अथातोऽग्निरनारभ्यन्यायेन प्रकृतिं गताः ।
दीक्षादिलिङ्गतस्तस्य ज्योतिष्टोमाङ्गता स्थिता ॥

पृथक्प्रकरणाम्नायाद्गुणकामाच्च नैत्यकः ।
अनिष्टप्रथमेत्यादेर्द्वैधे लिङ्गस्य दर्शनात् ॥

आग्नेऽपि सोमयागः स्यात्केवलं नोत्तरकृतौ ॥

स चाप्येकादशाकारश्येनादिः शुल्बदर्शितः ।
तत्र श्येनो द्विधा वक्रश्चतुरश्रश्च कीर्त्यते ॥

अर्थैक्यादाश्रयैक्याच्च शब्दैक्याच्छ्येनयोर्द्वयोः ।
विकल्पस्तुल्य एव स्याद्बिल्वखादिरयोरिव ॥ ७ ॥

End:

आपन्त्वाग्ने स्वगाकारेण ॥ ९ ॥

याजमानमुपस्थानमात्ययस्युः चतुष्पदाः ॥ १ ॥

अथोदवसानीयया यजते । अथ वैदिका हविर्भिर्यजते । 'देविकास्तु विकल्प्यन्ते आग्निकाद्वैधदर्शनात् ॥१॥' अथ त्रैधातवीयया यजते । त्रैधातवीया च प्रायश्चित्तसूत्रोक्तवर्त्मना । अथ सौत्रामण्या यजते । संवत्सरं न कञ्चन [प्रसन]प्रसत्यवरोहति न शीर्षमांसं खादति नवयस्य(सां) मांसं नाग्निं चित्वा शमामुपेयान्नाग्निचिद्वृषीत (?) धावेद्यदिधावेदुपावर्तेताग्नायमेवाभ्युपावर्तत इति ब्राह्मणम् ॥

Colophon :

इत्यग्निचयनसूत्रं समाप्तम् ॥

निरुपमगुणवल्ली देवसेनासनाथे
भुजबलहतदृप्यच्छूरपद्मासुरेन्द्रे ।
गिरिशगिरिदुहित्रोः प्रेमसर्वस्वपात्रे
भवतु मम कुमारे गाढमुद्दामभक्तिः ॥

श्रीवत्सान्वयवार्धिकौस्तुभमणिर्विश्वेश्वराध्वर्यभू-
स्तस्याभूत्प्रथमः सुतः किल महादेवाध्वरीन्द्रः सुधीः ।
श्रीनारायणदीक्षितो यदनुजस्तस्याभवन्सूनव-
श्चत्वारः पदवाक्यमाननिपुणा वेदा हि मूर्ता इव ॥ २ ॥

ज्यायान्विश्वेश्वराध्वर्यश्च विदितयशा वासुदेवाध्वरीन्द्रः
ख्यातश्श्रीरामचन्द्राध्वरकृदथ श्रीनिवासाध्वरीन्द्रः ।
तेषु ज्येष्ठस्य पुत्रो विरचितचयनानेकसंस्थाकसोम-
श्रीसुब्रह्मण्ययज्वा मम पितृचरणः सूत्रषट्कप्रवक्ता ॥ ३ ॥

अपामुपस्पर्शनमर्थासिद्धमुद्देशयागं परिषेचनादि ।
मन्त्रप्रतीके सकलञ्च मन्त्रं द्रव्यादिसङ्कल्पमपि ब्रवीमि ॥ ४ ॥

कारिकास्थितमन्त्रश्च कात्स्न्र्येनैव विलिख्यते ।
सन्तः समीक्ष्य तदिदं मोदन्तां गतमत्सराः ॥ ५ ॥

इति श्रीयज्ञेश्वरदीक्षितकृतकारिकासन्धीकृत-
बौधायनकल्पसूत्रे अग्निचयनसूत्रं सम्पूर्णम् ॥

Subject : Kārikāsandhīkṛtabodhāyanaśrautaprayogavivṛti—Mahāgnicayana only.

	c. पशुविषयप्रायश्चित्तम्	,,	73
	d. सोमप्रायश्चित्तम्	,,	74—76

Remarks :—The Ms. is in good condition. This Ms. abruptly ends in the middle of the fifth Paricccheda (i.e.) Paśubandha prakaraṇa.

॥ आधानप्रायश्चित्तम् ॥

2675. ĀDHĀNAPRĀYAŚCITTAM.

J. L. Collection No. 278. Substance—Paper. Size—6¾ × 4 inches. Sheets—9 (1-9 out of 15). Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—100. Author—?. Complete.

Beginning:

आधानारम्भे प्रायश्चित्तप्रयोगः ॥

श्रीगणेशाय नमः ॥ श्रीरस्तु ॥

" जातपुत्रः कृष्णकेशोऽग्नीनादधीत " इति । उपलक्षणञ्चैतत् । अजातपुत्रादीनामप्यग्न्याधानश्रवणात् ।

* * * *

तमाशिषमाशासेतं तव ज्योतिष्मतीमिति ब्रूयात् । यस्य पुत्रो जातस्स्यात् जायावान्दशमेह्नि अग्नि(मा)दधीतेत्यादिश्रुतिस्तु पुत्रोत्पादनसामर्थ्यं द्योतयति । न पुत्रोत्पत्तिम् । षोडशवर्षादूर्ध्वमिति फलितोर्थः । कृष्णकेश इति शरीरबलं

द्योतयति ॥ अथ त्रिकाण्डमण्डनः—

दर्शेष्टिपौर्णमासेष्टिसोमेष्यामवनी[य]जने ।
अग्निहोत्रविवाहश्च प्रयोगे प्रथमे स्थितम् ॥

End:

इत्याहुतीर्हुत्वा । व्रतग्रहणं करिष्य इति द्विजान्पृष्ट्वा तैः कुरुष्वेत्यनुज्ञातः प्रणवेन सर्वं पिबेत् । एतच्च ग्रामाद्बहिर्नक्षत्रदर्शने कार्यम् । अशक्तौ गोमूत्रादिकं स्वल्पं ग्राह्यम् । सर्वस्य पेयत्वात् । अस्मिन् दिने उपवासः । अशक्तस्य हविष्याशनम् । ततः प्रक्रान्तप्रायश्चित्तं सङ्कल्पानुसारेण कृत्वा उत्तराङ्गानि कुर्यात् । व्याहृतिभिराज्यं पूर्ववद्धुत्वा प्रायश्चित्ताङ्गविष्णुश्राद्धं गोदानञ्च पूर्ववच्चरेत् । ततो यस्य स्मृत्येति । मया आचरितेन प्राच्योदीच्याङ्गसहितेन प्रायश्चित्तेन पापहा महाविष्णुः प्रीयताम् ॥

Subject: Ādhānaprāyaścitta—a treatise dealing with the expiatory ceremonies connected with Ādhāna.

This Ms. contains the following important sections:-

(1) अधिकारी
(2) कालः
(3) नक्षत्रम्
(4) प्रायश्चित्तम्
(5) भस्मस्नानम्
(6) गोमयस्नानम्
(7) मृत्तिकास्नानम्
(8) पञ्चगव्यस्नानम्
(9) विष्णुपूजनम्
(10) होमः

Remarks:—The Ms. is in good condition. The other work contained herein is कूष्माण्डहोमः ॥

॥ अग्निहोत्रप्रायश्चित्तसङ्क्षेपः ॥

2676. AGNIHOTRAPRĀYAŚCITTA-SAṄKṢEPAḤ.

Burnell's Catalogue No. 4053. Page 27. Right column. Substance—Paper. Size—8½ × 5 inches. Sheets—8. Lines—10 to 11 to a Page. Script—Devanāgarī. No. of Granthas—150. Author—?. Complete.

Beginning:

श्रीगणेशाय नमः ॥

अग्निहोत्रप्रायश्चित्तान्युच्यन्ते ।

उदयकालेऽस्तमयकाले च प्रणयनातिक्रमे यथा पूर्वं प्रणयनादि हविरासादनान्तं[रं]कृत्वा स्वकालेऽन्यनुद्धरण-प्रायश्चित्तार्थं मनोज्योतिस्त्रयस्त्रिंशतं तव इति द्वे चतुर्गृहीते आज्याहुतीर्होष्यामि । "मनोज्योतिर्जुषतामाज्यं विच्छिन्नं यज्ञꣳसमं दधातु ॥"

* * * *

देवेभ्य इदम् । सर्वप्रायश्चित्तम् । इत्यनुद्धरणप्रायश्चित्तम् ।

End:

अथ पक्षहोमसङ्कल्पः ॥ अद्य प्रतिपदि सायंहोमादारभ्य चतुर्दशी सायंहोमपर्यन्तानि सायमग्निहोत्राण्यपकृष्यानेन सायमग्निहोत्रेण सह पयसा होष्यामीति ॥ तथैव द्वितीयायां प्रातर्होमादारभ्य पर्वप्रातःपर्यन्तानि प्रातरग्निहोत्राण्यपकृष्यानेन प्रातरग्निहोत्रेण सह पयसा होष्य इति ॥

पक्षहोमं तथा कृत्वा मध्ये तस्मान्निवर्तितः ।
होमं पुनः(श्च) कुर्याच्चेत्तदादोषो न विद्यते ॥

Colophon :

इत्यग्निहोत्रप्रायश्चित्तसङ्क्षेपः समाप्तः ॥

Subject: Agnihotraprāyaścittasaṅkṣepa—a summary of the expiatory ceremonies belonging to the Agnihotra.

This Ms. contains the following important sections:

1 अनुद्धरणप्रायश्चित्तम्

2 गार्हपत्याद्यनुगतप्रायश्चित्तम्

3 स्कन्नप्रायश्चित्तम्

4 इष्टिप्रायश्चित्तम्

5 पिण्डपितृयज्ञलोपप्रायश्चित्तम्

6 कपालभेदप्रायश्चित्तम्

7 स्वयञ्ज्वलनप्रायश्चित्तम्

8 अन्वाधानेष्टिमध्ये उपरागप्रायश्चित्तम्

Remarks:—The Ms. is in good condition.

॥ विध्यपराधप्रायश्चित्तम् ॥

2677. VIDHYAPARĀDHAPRĀYAŚCITTAM.

Burnell's Catalogue No. 3861. Page 27. Right column. Substance—Palm leaf. Size—10½ × 4½ inches. Sheets—33. Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—792. Author—?. Incomplete.

Beginning :

श्रीमहागणपतये नमः ॥

विध्यपराधे प्रायश्चित्तिः ॥

विधिशब्देन विहितमुच्यते । तस्याकरणेऽन्यथाकरणे प्रायश्चित्तिः कर्तव्या । प्रायोविनाशश्चित्तिः सन्धानं विनष्टसन्धानं प्रायश्चित्तिरित्युक्तं भवति । तथा च विध्यपराधे सति तदर्थं विशेषतो यद्विहितमस्ति तदेव कर्तव्यम् । नास्ति चेज्व्याहृतिहोमः कर्तव्यः । एतदेव सर्वप्रायश्चित्तमुच्यते । एवं च सति यथा कथञ्चिद्विधिसम्पादने प्रायश्चित्ताभाव उक्तो भवति प्रायश्चित्तकालस्तु निमित्तानन्तरमेवेत्युत्सर्गः ॥ ऐष्टिके तन्त्रे प्रधानस्विष्टकृत्समिष्टयजुर्होमाद्वा प्रागिति बोधायनः । विहितस्य द्रव्यस्य स्वरूपतो भावे प्रतिनिधिः स्वीकार्यः । क्वचित्स्वरूपसत्तायामपि प्रकृतकार्याशक्तौ प्रतिनिधिरेव स्वीकार्यः । तथा चार्थद्रव्ययोर्विरोधे अर्थो बलीयानिति सूचितं भवति । इदं चापरं सामर्थ्ये सति गुणसंपादनार्थं न प्रतिनिधिरुपादातव्यः । द्रव्यगुणविरोधे द्रव्यं बलवत् । एतदुक्तं भवति , यत्कार्यार्थतया यद्विहितं तस्य तत्कार्याशक्तौ तत्प्रतिनिधिरूपं तत्कार्यकरणाय स्वीकार्यम् , तथा च प्रतिनिधिप्रयोगेऽपि विहितस्वरूपापचाराद्विध्यपराधशङ्कया प्रायश्चित्तं न कर्तव्यम् , तत्र स एव विध्यर्थः फलितो भवतीति । तथा विनष्टसंधानं द्विविधम् तत् प्रत्यक्षमतीन्द्रियञ्च । तत्राद्यं यथायतनादपगतस्य वह्नेः पुनरुत्थापनं स्कन्नस्य वा हविषो ग्रहणार्थस्य पुनर्ग्रहणम् । द्वितीयं तु होमजपादिभिः । यत्रातीन्द्रिये सन्धाने होमा-

दि न विहितं तत्र भूर्भुवस्वः स्वाहेति सर्वप्रायश्चित्तमवश्यं कर्तव्यमिति वृत्तिकृदुक्तोऽयं नयः । यथापस्तम्बोक्तम् "श्रुतिलक्षणं प्रायश्चित्तं विध्यपराधे विधीयते" इति। तत्र प्रायश्चित्ते विहिते श्रूयमाणेष्व(णेऽ)ङ्ग सङ्ख्यादिकमविवक्षितम् । यथा पुरोडाशः क्षायेतेत्यत्रैकत्वं यद्यष्टापदीत्यत्रसंख्या तेन पुरोडाशयोर्बहूनां दाहे प्रायश्चित्तप्राप्तिः । तथा द्वादशपद्यां षोडशपद्यां वा प्रायश्चित्तम् । तथा च विध्यपराधे कर्मान्यथाकरणे श्रुत्युक्तं प्रायश्चित्तं विधीयते । यथान्तरागमनादौ यत्र च विधिरस्ति वाजपेये रथस्यान्तरागमनं तत्र प्रायश्चित्तप्रसक्तिरिति ॥

End:

अयमग्निः पुरीष्योरयिमान्पुष्टिवर्धनः । अग्नेः पुरीष्याभिषुम्न० दक्षिणाग्नौ 'अभयं व' इति ॥ पूर्ववदुपस्थाय । विहारादुदगासित्वा । 'भूर्भुवः सुवः' इति वाचं विसृजेत् । दशरात्रादूर्ध्वं प्रवासमापद्येत । चतुर्गृहीतमाज्यं हुत्वा । 'मनो ज्योतिर्जुषतामाज्यं मे विच्छिन्नं यज्ञं समिमं दधातु । या इष्टा उषसो या अनिष्टास्तासन्तनोमि हविषा घृतेन स्वाहा' इति तूष्णीमुत्पवनम् । अग्निहोत्रहोमे च विच्छेदाहुतिमिमां जुहुयात् । प्रतिहोममेके । गृहान्माविभीषोपवस्वस्त्येवोऽस्मासु प्रजायध्वं मा च वो गोपतीरिषत् । प्रपद्यते ॥

गृहानहं सुमनसः प्रपद्ये वीरघ्नो वीरवतः सुवीरान् ।
इरां वहन्तो घृतमुक्षमाणास्तेष्वहꣳ सुमनाः संविशानि ॥

Colophon :

इति प्रवासोपस्थानप्रायश्चित्तम् ॥

Subject : Vidhyaparādhaprāyaścitta giving the details of expiatory ceremonies coming under Ādhāna, Agnihotra, Darśapūrṇamāsa and Paśubandha. This Ms. specially deals with the following topics :—

I	परिभाषाप्रकरणम् ॥	Sheets 1—5
1	सकलप्रायश्चित्तोपयोगिपरिभाषा ॥	Sheet 1
II	आधानप्रकरणम् ॥	5—7
2	आधानेऽग्न्यनुगतप्रायश्चित्तम्	5
III	अग्निहोत्रप्रकरणम्	7—19
3	अग्निहोत्राग्न्यनुगमनप्रायश्चित्तम	7
4	अग्निहोत्रे द्रव्ये दुग्धासु प्रायश्चित्तम् ॥	11
5	अग्निहोत्रद्रव्यस्कन्नप्रायश्चित्तम्	,,
6	आग्निहोत्रान्तरागमने प्रायश्चित्तम्	14
7	अग्निहोत्रानुद्धरणप्रायश्चित्तम्	15
8	होमविच्छेदप्रायश्चित्तम्	33
9	अतिक्रान्तहोमप्रायश्चित्तम्	33
10	अकालहोमप्रायश्चित्तम्	35
IV	दर्शपूर्णमासप्रकरणम्	19—
11	अन्वाहितप्रायश्चित्तम्	38
a	कालातिपत्तिप्रायश्चित्तम्	39
b	नवनाटिकाहोमः	,,
12	हविर्दोषप्रायश्चित्तम्	40

13 स्कन्नप्रायश्चित्तम् 45

14 कपालभेदने प्रायश्चित्तम् 49

15 त्रैधातवेष्टिः 51

16 अभ्युदयेष्टिः 53

17 दर्शपूर्णमासादिषु विपर्यासप्रायश्चित्तम् 54

एकाध्वरप्रायश्चित्तम् ॥

V पशुबन्धप्रकरणम्

प्रवासोपस्थानप्रायश्चित्तम् ॥

Remarks:—The Ms. is in a fairly good condition. This work is a good compendium of the rules set forth by Āśvalāyana, Āpastamba and Bodhāyana on Vidhyaparādhaprāyaścitta.

At the end of this Ms., the following Prāyaścitta extract is given:—

दर्शपूर्णमासाग्रयणपशुसोमानामाधानानन्तरं स्वकालेऽनारम्भे पथिकृती वैश्वानरी च पूर्वं कर्तव्ये। अथवा विभ्रष्टेष्टिः कर्तव्या। अत्र दर्शपूर्णमासारम्भात् पूर्वं विकृत्यनुष्ठानार्थमपि सारस्वतहोममन्वारम्भणीयाञ्च कृत्वा विभ्रष्टेष्टिं कृत्वा पुनर्दर्शपूर्णमासारम्भार्थं सारस्वतहोममन्वारम्भणीयाञ्च कृत्वा चतुर्होतारं हुत्वा पूर्णमासेन यजेत ॥

* * * *

यदि दक्षिणाग्निसुद्धा...येत् गार्हपत्यादुद्धृत्य दक्षिणे चतुर्होतारं गार्हपत्ये दशात्मकं जुहुयात्। भिन्नयोनित्वपक्षे चतुर्होतृत्वमात्रं न दशात्मकहोमः ॥

॥ विध्यपराधप्रायश्चित्तम् ॥

2678. VIDHYAPRĀDHAPRĀYAŚCITTAM.

J. L. Collection No. 279. Substance—Paper. Size—6 × 3½ inches. Sheets—57(1-60 ; 27, 43 & 59 are missing). Lines —9 to a Page. Script—Devanāgarī. No. of Granthas—650. Author—(?). Incomplete.

Beginning—Same as No. 2677.

End:

अथ चातुर्मास्यादिषु आमिक्षाया एव(मेकदेश) दोहनाशे तं पुनरासाद्यायाः(रुत्पाद्ययागः ।) उभयदोहनाशे आज्येन यागः । वाजिनेत्या(प्या)ज्यमेव प्रतिनिधिः । सर्वप्रायश्चित्तश्च न सान्नाय्यप्रायश्चित्तम् । यदीष्टिमध्ये यजमानक(म)रणं स्यात्तदा सर्वेभ्यो हविर्भ्यो द्विर्द्विरवदाय देवता(ः ?) समुच्चार्य स्वाहाकारेण जुहुयात् । अनिरुप्ते (हविषि प्रयोगत्याग एव) ॥

Colophon: (Sheet No. 38)

इत्याग्निहोत्रप्रकरणम् ।

Subject: Vidhyaparādhaprāyaścitta-a prayoga treatise giving the details of expiatory ceremonies in the Ādhāna, Agnihotra and Darśapūrṇamāsa sacrifices.

Remarks :—The Ms. is in a fairly good condition. The first and last sheets are a bit worn out. This Ms. breaks off towards the end of Darśapūrṇamāsaprāyaścitta.

॥ आश्वलायनकूष्माण्डहोमप्रयोगः ॥

2679. ĀŚVALĀYANAKŪṢMĀṆḌAHOMA-PRAYOGAḤ.

Burnell's Catalogue No. 3898 a. Page 143, Right column. Substance—Paper. Size—$10\frac{7}{8} \times 4\frac{7}{8}$ inches. Sheets—10 (1-10). Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—200. Author—(?). Complete.

Beginning:

श्रीगणेशाय नमः ॥

कूश्माण्डहोमगणहोमविधिः ॥

स च कृच्छ्रादिना शुद्धस्यापि नियतः कर्मादिष्वेतैर्जुहुयादिति वचनात् । अत एव शुद्धोऽपि कूश्माण्डगणाहुतिः क्रमादिति कुर्यात् ॥ कल्पसारः ॥ तत्प्रकारमाह जमदग्निः—

अथातः संप्रवक्ष्यामि कूष्माण्डविधिमुत्तमम् ।
एनसां स्थूलसूक्ष्माणां प्रायश्चित्तन्तु वैदिकम् ॥
अपूर्वं विहितं कर्म निन्दितं च समाचरन् ।
प्रसज्य चेन्द्रियार्थेषु प्रायश्चित्ती भवेद्द्विजः ॥
केशश्मश्रू वापयित्वा स्नात्वा पुण्यजलाशये ।
आज्यभागानन्तरेण कूश्माण्डैर्जुहुयाद्द्विजः ॥
यद्देवेत्यनुवाकैश्च त्रिभिर्हुत्वाज्यमन्वहम् ।
वैश्वानरायेत्येताभिस्तमग्निमुपतिष्ठते ॥
यदित्याधाय समिधं जयादि प्रतिपद्यते ।

कर्मादिष्वेतैर्जुहुयात्पूतः स्वर्गं समश्नुते ॥

End

यदन्नमद्मयनृतेन देवा
दास्यन्नदास्यन्नुत वा करिष्यन् ।
यद्देवानां चक्षुष्यागो अस्ति यदेव किञ्च
प्रतिजग्राहमग्निर्मा तस्मादनृणं कृणोतु ॥
यदन्नमद्मि बहुधा विरूपं
वासो हि(र)ण्यमुत गामजामविम् ।
यद्देवानां चक्षुष्यागो अस्ति यदेव किञ्च
प्रतिजग्राहमग्निर्मा तस्मादनृणं कृणोतु ॥ १२ ॥

इति द्वादशेन सूक्तेनोपस्थायोपविश्य त्रयोदश्याः समिधमग्नावादध्यात् । यन्मयेत्यस्य मन्त्रस्य ब्रह्मा स्वयंभू ऋषिः अग्निर्वैश्वानरो देवता अनुष्टुप्छन्दः समिद्धोमे विनियोगः । "ॐ यन्मया मनसा वाचा कृतमेनः कदाचन । सर्वस्मात्तस्मान्मेलितोमोग्धि त्वꣳ वेत्थ यथा तथꣳस्वाहा" । अग्नये वैश्वानरायेदं० । वरं ददाति । अथ पूर्वावत्तं स्विष्टकृतं जुहुयात् । "यदस्य कर्मणः" इति मन्त्रेण ततः रज्जुप्रहरणादिहोमशेषं समाप्याग्नेणाग्निमश्वत्थपर्णेषु निदधाति ॥ ततः पूर्णपात्रनिनयनादि कर्मसमर्पणान्तं कृत्वा द्वादशावरान्ब्राह्मणान्भोजयित्वा व्रतं परिसमाप्य ततो गणहोमं कुर्या(त्) ॥

Colophon:

इति कूष्माण्डहोमः ।

Subject: Kūṣmāṇḍahomaprayoga—according to the Āśvalāyana school of Ṛg-Veda. This is one of the main

expiatory ceremonies to be performed by every Yajamāna to purify his soul, just before the performance of any vedic sacrifice.

Remarks :—The Ms. is in good condition. The other work contained herein is Gaṇahoma.

॥ बोधायनकूष्माण्डहोमप्रयोगः ॥

2680. BODHĀYANAKŪṢMĀṆḌAHOMA-PRAYOGAḤ.

Burnell's Catalogue No. 3884. Page 143. Right column. Substance—Paper. Size—9½ × 4½ inches. Sheets —10 (1-10). Lines-9 or 10 to a Page. Script—Devanāgarī. No. of Granthas—525. Author—? Complete.

Beginning :

श्रीगणेशाय नमः ॥

अग्नीनाधास्यमानः पापस्य तारतम्यं विचार्य संवत्सरं मासं चतुर्विंशतिदिनानि द्वादशदिनानि षड्दिनानि त्रिदिनानि वा कूष्माण्डं जुहुयात् । अमावास्यायां पौर्णमास्यां वोपक्रमः । अथ कूष्माण्डहोमप्रयोगः । प्राणानायम्य, तिथ्यादि सङ्कीर्त्य । आधानाधिकारसम्पादकससस्तपातकनिवर्हणार्थं कूष्माण्डैर्होष्ये इति सङ्कल्प्य, श्मश्रुकेशलोमनखानि वापयित्वा, स्नानादि विधाय, पुण्याहं वाचयित्वा, तिथ्यादि सङ्कीर्त्य, पूर्ववत् सङ्कल्प्य, स्थण्डिलाग्न्निमुखान्तं कृत्वा, आघारान्तं सङ्कल्प्य, सवितारञ्चरुद्रव्येण देवादीन् तत्तन्मन्त्रार्थानाज्येन स्विष्टकृतमग्निमित्यादि सङ्कल्प्य, आघारार्थं तन्त्रं कृत्वा, तत्सवितुर्व-

रेण्यमित्येतया चरुं सावित्रे हुत्वा, स्विष्टकृतमवदायान्तः-
परिधि सादयित्वा, आज्याहुतीर्जुहोति ।

End:

यदन्नमन्नयनृतेन देवा दास्यन्नदास्यन्नुतवा करिष्यन् ।
यद्देवानां चक्षुष्यागो अस्ति यदेव किञ्चित्प्रतिजग्राहमग्नि-
र्मा तस्मादनृणं कृणोतु ॥
यदन्नमद्भि बहुधा विरूपं वासो हिरण्यमुत गामजामविम् ।
यद्देवानां चक्षुष्यागो० ॥ इत्युपस्थानम् । अथ त्रयोदश्यां
समिधमादध्यात् ।
यन्मया मनसा वाचा कृतमेनः कदाचन ।
सर्वस्मात्तस्मान्मेळितो मोग्धि तꣳ हिवेत्थं यथा तथꣳस्वाहा ॥
अग्नय इदम् ॥ स्विष्टकृदादि समाप्य वरदानं कृत्वाग्नेः
पुरस्तादश्वत्थपर्णे हुतशेषं निदध्यात् । यावद्धोमदिनानि
तावन्मास स्त्रीपर्यङ्कादिशयनामृतवर्जनं पयोभक्षणमशक्ता-
वोदनादि ॥

Colophon:

इति कूष्माण्डहोमः ॥

Subject: Kūśmāṇḍahomaprayoga—belonging to the Bodhāyana school of the Black Yajur-Veda.

Remarks:—The Ms. is in good condition. The other work contained herein is 'गणहोम'. On the title page is given

'इदं बोधायनकूष्माण्डहोमपुस्तकं पुरुषोत्तममट्ट लाण्डगेयाचे' 'सयीबायी जतकून मागून घेतल'

The hymns quoted in this Ms. are accented.

॥ कूष्माण्डहोमप्रयोगः ॥

2681. KŪṢMĀṆḌAHOMAPRAYOGAḤ.

J. L. Collection No. 280. Substance—Paper. Size—6 ×4 inches. Sheets—7 (9-15). Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—100. Author—(?). Complete.

Beginning:

अथ कूष्माण्डहोमः ।

श्रीगणेशाय नमः ॥

अग्नीनाधास्यमानः पापस्य तार्त(तारत)म्यं विचार्य संवत्सरं मासं चतुर्विंशतिदिनानि द्वादशदिनानि षड्दिनानि त्रीणि दिनानि वा कूष्माण्डैर्जुहुयात् । अमावास्यायां वा अन्यत्र विहितकाले पूर्वाह्णे उपक्रमः । अथ कूष्माण्डहोमप्रयोगः ॥ प्राणानायम्य, तिथ्यादि सङ्कीर्त्य ॥

End:

"यन्मया" इति मन्त्रस्य ब्रह्मा स्वयं ऋषिः अग्निर्देवतानुष्टुप्छन्दः समिद्धोमे विनियोगः । "यन्मया मनसा वाचा कृतमेनः कदाचन ।

सर्वस्मात्तस्मान्मोलितोमोग्धि त्वꣳहि वेत्थ यथा तथꣳस्वाहा" ।

अग्नय इदम् । यावद्धोमदिनानि तावत् (न)मांसस्त्रीपर्यङ्का दिवास्वापानृतवदना पयोभक्षणं अत्रो(श)क्तावोदनादि ॥

Colophon:

इति कूष्माण्डहोमः समाप्तः ।

श्रीकृष्णार्पणमस्तु ॥ गाम्भीरेः ॥

Subject: Kūśmāṇḍahomaprayoga.

Remarks:—The Ms. is in good condition. This Ms. belonged to one Gāmbhīri, otherwise known as Bhāskararāya son of Ghambhirarājabharatīdīkṣita. The other work contained herein is Prāyaścittaprayoga.

॥ आश्वलायनगणहोमप्रयोगः ॥

2682. ĀŚVALĀYANAGAṆAHOMAPRAYOGAḤ.

Burnell's Catalogue No. 3898 b. Page 143. Right column. Substance—Paper. Size—$10\frac{7}{8} \times 4\frac{7}{8}$ inches. Sheets—13 (11—23). Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—240. Author—?. Complete.

Beginning:

अथ गणहोमः । त(त्र) सङ्ग्रहकारः ।
गणहोमं प्रवक्ष्यामि श्रौताधानादिसिद्धये ।
बौधायनमतेनैव समासेन यथातथम् ॥
आधानादि चिकीर्षुः सन् सपत्नीको धृतव्रतः ।
पूर्वाह्णे नित्यकर्मान्ते गृह्याग्निं सुसमिध्य च ॥
पाकयाज्ञिकधर्मेण स्वगृह्योक्तविधानतः ।
सह प्रणीतापात्रेण कलशं तन्तुवेष्टितम् ॥
आसाद्योदकसंपूर्णं कृत्वाग्नौश्रपयेच्चरुम् ।
तूष्णीं है होमपर्यासं निर्वापप्रोक्षणान्वितम् ॥
जुहुयादाज्यभागान्ते सावित्र्यादाय तं स्रुचा ।
अवदाय स्विष्टकृते तत्संस्थाप्य च बर्हिषि ॥
अवशिष्टे चरौ तस्मिन्नाज्यं सिञ्चेद्यथाप्लुतम् ।
आदायमेक्षणेनैव हुनेत्तच्चाष्टभिर्गणैः ॥

षळृचोग्नेनयेत्याद्योऽष्टादशर्चस्तु योरुषः ।
द्वाविंशर्चोमृगाराख्यो योगमिति चतुर्ऋचः ॥
यावामिति ततोऽष्टर्चस्ततः सप्तदशर्चकः ।
पावमानस्तु षष्ठस्यादच्छिद्रपठितस्ततः ॥
यद्दैवा इति विंशर्चोऽष्टर्चो वैश्वानरोऽष्टमः ।
एवञ्चोत्तरशतं मन्त्राः स्युर्गणहोमके ॥
इति हुत्वा ततः स्विष्टकृतं प्राक्स्थापितं हुनेत् ।
स्वगृह्योक्तविधानेन होमशेषं समापयेत् ॥

End:

"यमु द्विष्मस्तमु जहि" इति पठित्वा ततः "सुमित्रा न आप ओषधयः सन्तु" इति कलशादञ्जलिनोदकं गृहीत्वा "दुर्मित्रास्तस्मै भूयासुर्योस्मान्द्वेष्टि यञ्च वयं द्विष्मः" इति द्वेष्यदिशि निषिच्य, ततस्तूष्णीं तत्कलशं पृष्ठतः परास्थाय, उपस्पृश्यानवेक्षमाणो गृहमागत्य, स्नात्वाचम्य कर्म समर्पयेत् । एवं सप्ताहादि यथासङ्कल्पं त्रिषवणं कृत्वा तदन्ते ब्राह्मणान्संभोज्य गोहिरण्यादि दक्षिणां दत्वा नियतो भवेत् ॥

Colophon:

इति गणहोमः ॥

Subject: Gaṇahomaprayoga, belonging to the Āśvalāyana school of the Ṛg-Veda, giving the prayoga details of the Gaṇahoma—an expiatory ceremony to be performed by all yajamānas just before the beginning of all Vedic Sacrifices.

Remarks:—The Ms. is in fairly good condition. The other work contained herein is 'कूष्माण्डहोमप्रयोगः'

॥ बोधायनगणहोमप्रयोगः ॥

2683. BODHĀYANAGAṆAHOMAPRAYOGAḤ.

Burnell's Catalogue No. 3884 b. Page 143. Right column. Substance—Paper. Size—9½ × 4½ inches. Sheets—11 (11—21). Lines—9 or 10 to a Page. Script—Devanāgarī. No. of Granthas—150. Author—(?). Complete.

Beginning :

अथ गणहोमः ॥

पूर्वाह्णे गृह्याग्निं प्रतिष्ठाप्य, प्राणानायम्य, तिथ्यादि सङ्कीर्त्य, आधानाधिकारसंपादकसमस्तपापक्षयार्थं अग्नेषकर्मानुष्ठानयोग्यतासिद्ध्यर्थञ्च गणहोमं करिष्ये । आघारान्तं तन्त्रं सङ्कल्प्य । अत्र प्रधानं सवितारश्चरुद्रव्येण स्विष्टकृतमाग्निमित्यादि कुर्यात् । पक्वश्चरुं सावित्र्या हुत्वा चरौ प्रभूतमाज्यमानीय जहुयात् । "अग्ने नय" इति षष्टर्चस्य सूक्तस्य विश्वेदेवा ऋषयः अग्निर्देवता त्रिष्टुप् छन्दः । चरुहोमे विनियोगः ।

अग्ने नय सुपथा राये अस्मान्विश्वानि देव वयुनानि विद्वान् । युयोध्यस्मज्जुहुराणमेनो भूयिष्ठान्ते नम उक्तिं विधेम स्वाहा ॥

End :

"यमु द्विष्मस्तमुज्जहि" इति ततस्ताः पात्रगताः आपो निर्ऋत्यां दिशि स्ववैर्यधिष्ठितायां वा दिशि निनयति । "दुर्मित्रास्तस्मै भूयासुर्योस्मान् द्वेष्टि यञ्च वयं द्विष्मः" । इति । अथ पात्रं परास्य पृष्ठतोऽनवेक्ष्य(क्ष)माणो यथा-

गतमागत्य हस्तादि क्षाळनं कुर्यात् । कर्मान्ते ब्राह्मणान् पायसादिना भोजयित्वा गोहिरण्यादि ब्राह्मणेभ्यो दद्यात् । अथ माघादिपञ्चमासेषु श्रावण्याश्विनमार्गशीर्षमासेषु वा कृत्तिकारोहिणीपुनर्वसु पूर्वा ३ उत्तरा ३ चित्रामृगश्रवणानूराधासु ॥

Colophon:

इति कूष्माण्डगणहोमः समाप्तः ॥

Subject: Gaṇahomaprayoga according to the Bodhāyana school of the Black Yajurveda giving the prayoga details of the Gaṇahoma—an expiatory ceremony in vedic sacrifice.

Remarks:—The Ms. is in good condition. The other work contained herein is 'कूष्माण्डहोमः'

॥ कूष्माण्डगणहोमप्रयोगः ॥

2684. KŪṢMĀṆḌAGAṆAHOMAPRAYOGAḤ.

Burnell's Catalogue No. 9148 a. Page 25. Left column. Substance—Palm leaf. Size—18 × 1 inches. Leaves—7 (1—7). Lines—8 to a Page. Script—Grantha. No. of Granthas—150. Author—(?). Complete.

Beginning:

(कूष्माण्डहोम)प्रयोग उच्यते ।

अमावास्यायां पौर्णमास्यां वा केशश्मश्रुलो(मनखानि वापयित्वा अहत) वासा यजमानः प्रातरौपासनं कृत्वा दर्भेष्वासीनो दर्भान् धारयमाणः पव.....कल्पं करोति । अस्यां पुण्यतिथौ ममोपात्तदुरितक्षयद्वारा परमेश्वरप्री

.....नि(यावन्त्येनांसि सम्भवन्ति तावतोमनसां नि-
र्हरणद्वारा करिष्यमाणाभ्या.....र्थं त्र्यहं
कूष्माण्डैर्होष्यामि ॥

* * *

ब्रह्मणे वरं ददाति अभ्युदयं पुण्याहञ्च कुर्यात् ।
सन्तिष्ठते कूष्माण्डहोमः ॥

ब्रह्मचारी कल्पेन व्रतमुपैति । संवत्सरादि त्रिरात्र्यन्तं
व्रतं न मांसमश्नीयात् न स्त्रियमुपेयात् नोपर्यासीत जुगु-
प्सेतानृतात् पयोभक्ष इति प्रथमः इति कल्पः ॥

क्षापवित्र सहस्राक्षं मृगारां होमुचौ गणौ ।
पावमान्यश्च कूष्माण्ड्यो वैश्वानर्यऋचश्च याः ॥

घृतोदनेन ता जिह्वन् सप्ताहं सवनत्रयम् ।
एकाहं (वा) त्र्यहं वापि प्रत्यहं सकृदेव वा ॥

मौ(नं) व्रती हविष्याशी जितक्रोधो जितेन्द्रियः ।
सिंहे म इत्यपाम्पूर्णेपात्रे वेक्ष्य चतुष्पथे ॥

मुच्यते सर्वपापेभ्यो महतः पातकादपि ।

उत्तरायणे पूर्वेपक्षे पुण्ये नक्षत्रे प्रातरौपासनं हुत्वा
प्राणानायम्य पत्न्या सह सङ्कल्पः अंह आगएनोर्निर्हर-
णार्थं सप्ताहं सवनत्रयं वा गणैर्होष्यामि उल्लेखनादिप्राकृतो-
यनिधानान्ते श्रपयित्वा अभिघारणं अग्नेः उपसमधानादि
प्रणीताप्रणयनं कृत्वा कलशं पूरयित्वा उत्तरेणाग्नि दर्भेषु
सादयति ब्रह्मा वागाद्यग्निमुखान्ते चरावाज्यमानीय द-

व्योपघातं सर्वाहुतीर्जुहोति । "अग्ने नय सुपथा + नम-
उक्तिं विधेम स्वाहा" । अग्नय इदं० ॥

End:

"वैश्वानरस्य सुमतौ + सूर्येण स्वाहा" । सर्वेषामग्नये
वैश्वानरायेदं चरुमभिघार्य स्विष्टकृतं जुहोति । पूर्ववदुपा-
घातपक्ष एव । जयादि प्रतिपद्यते परिषेचनान्तं कृत्वा
परिध्यञ्जनादि पूर्ववत् ब्रह्मोद्वासनं कलशमादाय चतुष्पथं
वाच्छन्तीपादौ प्रक्षाल्याचम्योपविश्य जपति ॥

Colophon :

गणहोमस्समाप्तः ॥

Subject: Kūṣmāṇḍahomaprayoga and Gaṇahomaprayoga.

Remarks:—The Ms. is in a fairly good condition. For the other works contained herein see Remarks under No. 2357.

The following is given after the colophon:—

सिंहे मे मन्युः । व्याघ्रे मेन्तरामय । वृके मे क्षुत् ** "यमु-
द्विष्मस्तमुज्जहि" अपो दृष्ट्वा जपति । "सुमित्रा न आप 'ओ-
षधयः सन्तु दुर्मित्रास्तस्मै भूयासुर्योऽस्मान् द्वेष्टि यञ्च वयं
द्विष्मः" । पाप्मन् नैर्ऋत्यां निरस्य अप उपस्पृश्य ॥

॥ कूष्माण्डगणहोमप्रयोगः ॥

2685. KŪṢMĀṆḌAGAṆAHOMAPRAYOGAḤ.

Burnell's Catalogue No. 3688. Page 23. Right column Substance—Paper. Size —11 × 4½ inches. Sheets—12. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—175. Author—?. Complete.

Beginning:

अथ कूष्माण्डहोमः ॥

अग्नीनाधास्यमानः सर्वदुरितपूर्वपाप(पनोदनक्ष)मः सर्वप्रायश्चित्तरूपं कूष्माण्डहोमं कुर्यात् । अमावास्यायां वा यजेत ॥ तस्यायं प्रयोगक्रमः । एनोनिर्हरणार्थं कूष्माण्डैर्होष्यामीति सङ्कल्प्य श्मश्रुकक्ष[ः]लोमनखानि वापयित्वा स्नानाद्यनन्तरं देवतादिसङ्कल्पं कुर्यात् ॥

❀ ❀ ❀

अथ कर्माङ्गकृतः प्रयोगः

अग्न्याधेये पूर्णाहुतिं हुत्वा कूष्माण्डैर्जुहुयात्पूतो देवलोकान्समश्नुत इति ब्राह्मणम् ॥

इति कूष्माण्डहोमः ॥

अथ गणहोमः ॥

पापा(प)नोदनकामः पूर्वाह्णे गृह्याग्निं प्रतिष्ठाप्य प्राणानायम्य समस्तपापक्षयार्थं अशेषकर्मानुष्ठानयोग्यतासिध्यर्थं गणहोमं करिष्ये ॥

End:

पावमानीःसु०स्वती । ऋषिभिः०हितं स्वाहा । पा० इदम् । पावमानीर्दि०ता स्वाहा । पा०दम् । पावमानीस्व० श्च्युतः । ऋषिभि०हितम् । स्वाहा । पा०इदम् । येन दे(वाः)

Colophon: Nil.

Subject: Kūṣmāṇḍagaṇahoma Prayoga.

Remarks:— The Ms. is in good condition. This Ms. abruptly breaks off towards the end of Gaṇahoma.

॥ आपस्तम्बोत्सर्गेष्टिप्रयोगः ॥

2686. ĀPASTAMBOTSARGEṢṬIPRAYOGAḤ.

Burnell's Catalogue No. 9110 g.

Substance—Palm leaf. Size—16¼ × 1½ inches. Leaf-(7th) Lines—7 or 8 to a page. Script—Telugu. No. of Granthas—28. Author—(?). Complete.

Beginning:

अग्नीनाधास्ये । अ—विभूयासमिति सङ्कल्प्य । तत उत्सर्गेष्टिः । पुनस्सङ्कल्प्य । इष्ट्वा यक्ष्ये । "विद्युदसि" "अद्य यज्ञाय" "इमामूर्जम्" पिष्टैर्हविः । पौर्णमासं तन्त्रम् । पञ्चदश सामिधेन्यः । पात्रप्रयोगकाले अष्टात्रिंशत्कपालानि स्थालीस्पयश्च द्वन्द्वं । इतराणि प्रकृतिवत् ॥

End:

विरुज्य प्राशित्रं चतुर्धाकरणं अन्वाहार्ये दक्षिणे "यज्ञो बभूव" यज्ञशञ्च । ब्राह्मणभोजनान्तम् । श्वः प्रकृतेष्टिङ्कृत्वा आयतनस्थाने सर्वानग्नीन् ज्वलन्तमुत्स्पृशति ॥ ९ ॥ वर्षानुशरदि..... ॥

Colophon : Nil.

Subject: Āpastambotsargeṣṭiprayoga—giving the prayoga details of the Utsargeṣṭi, according to the Āpastamba school of the Black Yajurveda.

Remarks: —The Ms. is in a much decaying condition. Dr. Burnell has failed to note this work though the No. has been noted by him. For the other works contained in this Ms. see the list under Remarks on No. 2099.

॥ काम्येष्टयः ॥

2687. KĀMYEṢṬAYAḤ.

Not Noticed by Burnell.

Substance—Paper. Size—7⅛×6 inches. Sheet—1. Lines—22 to a Page. Script—Devanāgarī. No. of Granthas—40. Author—(?) Incomplete.

Beginning:

अथ काम्येष्टीनां स्थाने काम्याश्चरवस्तानेव नामानाप्नोति । अनाहिताग्निः पर्वण्यौपासने कुर्यात् । तेषां पार्वणस्थालीपाकवन्नाममन्त्रेण निर्वापप्रोक्षणहोमाः । अथाग्नेयाश्चरवो विकल्पवर्जिताः प्रजाकाम इन्द्राग्निभ्यां तामेवेच्छन् पुत्रे वा जाते वा स निमेष्यं वैश्वानराय आयुष्काम आयुष्मत इन्द्राय त्रात्रे च स्वस्त्ययनकामस्वस्तिमते भूतिकामो जातवेदसे आशादादित्येभ्यो भुवज्ञो (?) वा पुत्रकामः पुत्रिणे तस्मा इन्द्राय पुत्रिणे च वा रुचिकामो रुक्मते तेजस्कामस्तेजस्वते सर्वमायुरेष्यन् क्षामवते ग्रहदाहे च समानेषु श्रैष्ठ्यकामो मूर्धन्वते कामसिद्धये कामाय क्षेत्रेषु वा सजातेषु वा स्पर्धमाने यविष्ठाय क्षेत्रपतये० ॥

End:

सर्वजनमैत्रीं कृत्स्नपापापनुत्तिं पवित्रतां चेच्छन्नग्नयेऽंहोमुच इन्द्रायाँहोमुचे मित्रावरुणाभ्यामागो मुग्भ्यां वायुसवितृभ्यमागो मुक् सामश्विभ्यामागो मुग्भ्याम् । मरुद्भ्य एनोमुग्भ्यो विश्वेभ्यो देवेभ्य एनोमुग्भ्योऽनुमत्याग्नये वैश्वानराय द्यावापृथिवीभ्यामेनो मुग्भ्यामिति च दशभ्य इति पूर्वोक्तमेव कामयन्, अग्नये पवमानाय,

सरस्वत्यै प्रियायै, अग्नये पावकाय, सवित्रे सत्यप्रसवायाग्नये शुचये, वायवे नियुत्वते, अग्नये व्रतपतये, दधिक्राव्णे, अग्नोग्नये (?) वैश्वानराय, विष्णवे शिपिविष्टायेति च दशभ्य इति ॥

काम्याः संगृह्य लिखिताः केचनात्र यथामति ।
शिष्टांस्तु श्रुतितो ज्ञेयाः सूत्रेभ्यस्तत्र तत्र तु ॥

इति ॥ श्रीः ॥

Colophon : Nil.

Subject : Kāmyeṣṭis performed for the attainment of various objects in life. This Ms. gives a complete list of Kamyeṣṭis.

Remarks :—The Ms. is in a decaying condition.

॥ आश्वलायनकुण्डलेष्टिप्रयोगः ॥

2688. ĀŚVALĀYANAKUṆḌALEṢṬIPRAYOGAḤ.

Burnell's Catalogue No. 3951. Page 26. Left column. Substance—Paper. Size—10 × 4½ inches. Sheets—3. Lines—7 or 8 to a page. Script—Devanāgari. No. of Granthas—20. Author—(?) Complete.

Beginning :

श्रीगणेशाय नमः ॥

कुण्डलेष्टिप्रयोगः ॥

अस्या इष्टेः पञ्चदश सामिधेन्यः । वार्तघ्नावाज्यभागौ । अग्निस्सोमो वरुणः सरस्वत्याग्नाविष्णू च प्रधानदेवताः । स्विष्टकृत्प्रयाजादयोऽङ्गदेवा आज्यपाश्च । "नमः

प्रवक्ष्ये" इत्यादि "आ वह देवान्यजमानाय । अग्निमग्न आवह । सोममावह । अग्निमावह । सोममावह । वरुणमावह । सरस्वतीमावह । अग्नाविष्णू आवह । देवाँ-आज्यपाम्" इत्यादि ।

End:

प्रिप्रीहि देवा० यजिष्ठोम ॥ ये० हेप्रिं स्विष्टकृतम् ॥ "अयाळग्निरग्नेः प्रियाधामान्ययाट्सोमस्य प्रियाधामान्ययाळग्नेः प्रियाधामान्ययाट् सोमस्य प्रियाधामान्ययाद्वरुणस्य प्रियाधामान्ययाद् सरस्वत्याः प्रियाधामान्ययाळग्नाविष्णवोः प्रियाधामान्ययाद्देवानामाज्यपानाम् ।" इत्यादि "जुषतां हविरग्ने यदद्य० अद्यावौ० ॥ सूक्तवाके ॥ अग्निरिदं+कृत ॥ सोम इदं+कृत ॥ अग्निरिदं० सोम इदं ॥ वरुण इदं ॥ सरस्वतीदं ॥ अग्नाविष्णू इदं० वृधे वां महोज्यायो क्रातामृ । देवा आज्यपाः" इत्यादि संस्थाजपान्तम् ॥ संपूर्णः ॥

Colophon: Nil.

Subject: Āśvalāyanakuṇḍaleṣṭi or Āyuṣkāmeṣṭi prayoga giving the prāyoga details of the Kuṇḍaleṣṭi (the duties of the Hotṛ priest) according to the Āśvalāyana School of the Ṛg Veda.

Remarks :—The Ms. is in good condition.

॥ आश्वलायनकुण्डलेष्टिप्रयोगः ॥

2689. ĀŚVALĀYANAKUṆḌALEṢṬIPRAYOGAḤ.

Burnell's Catalogue No. 3952. Page 26. Left column.

Substance—Paper. Size—10×4¾ inches. Sheets—2. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—20. Author—(?) Complete.

Beginning, end, colophon and subject—Same as No. 2688.

Remarks:—The Ms. is in a good condition.

॥ आश्वलायनकुण्डलेष्टिप्रयोगः ॥

2690. ĀŚVALĀYANAKUṆḌALEṢṬIPRAYOGAḤ.

Burnell's Catalogue No. 3953. Page 26. Left column. Substance—Paper. Size—10×4¾ inches. Sheet—1. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—20. Author—(?) Complete.

Beginning, end, and subject—Same as No. 2688.

Colophon:

कुण्डलेष्टिहौत्रं समाप्तम् ॥

Remarks: —The Ms. is in a good condition.

॥ आश्वलायनकुण्डलेष्टिप्रयोगः ॥

2691. ĀŚVALĀYANAKUṆḌALEṢṬIPRAYOGAḤ.

Not Noticed by Burnell.

Substance—Paper. Size—10×3½ inches. Sheet—1. Lines—10 to a Page. Script—Devanāgari. No. of Granthas—20. Author—(?). Complete.

Beginning, end, colophon and subject—Same as No. 2688.

Remarks:—The Ms. is in good condition.

॥ कुण्डलेष्टिप्रयोगः ॥

2692. KUNDALESTIPRAYOGAH.

Burnell's Catalogue No. 3875. Page 25. Right column. Substance—Paper. Size—10⅘×4⅘ inches. Sheets—3. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—50. Author—(?) Complete.

Beginning :

अथ आयुष्कामेष्टिप्रयोगः ॥ कुण्डलेष्टिः ॥

ज्योगामयावीसर्वायुष्कामी वा यः कश्चिदमावास्यां पौर्णमास्यां वा प्रातरग्निहोत्रं हुत्वा । पत्न्या सह प्राणानायम्य शरीरे वर्तमानरोगशान्त्यर्थं आयुष्याभिवृद्ध्यर्थं समस्तपापक्षयार्थं इष्ट्या यक्षे । "विद्युदसि" "अग्न यज्ञाय" "इमापूर्जं पञ्चदशीम्" । ऐष्ट्रं हविः । पौर्णमासतन्त्रम् ।

❀ ❀ ❀ ❀

End :

"आयुरसि विश्वायुरसि सर्वायुरसि सर्वमायुरसि । सर्वं म आयुर्भूयात् । सर्वमायुर्गेपम्" एवं सव्ये । "आयुरसि० गेपम्" "अग्निरायुष्मान्" इत्यनुवाकशेषेण षड्भिर्मन्त्रैरध्वर्युर्यजमानस्य हस्तं गृह्णाति ।

* ❀ ❀ *

आग्नेयवारुणसारस्वतानां चतुर्धाकरणम् । अन्वाहार्यो दक्षिणा । यथादेवतमुज्जितयः । यज्ञो बभूव । यज्ञश्चमवर्जम् । ब्राह्मणतर्पणान्तम् । सन्तिष्ठते आयुष्कामेष्टिः

Colophon :

सम्पूर्णः ॥

Subject: Kuṇḍaleṣṭi or Āyuṣkāmeṣṭi prayoga giving the prayoga details of the Kuṇḍaleṣṭi which is to be performed by those who aim at longevity.

Remarks:—The Ms. is in good condition.

॥ कुण्डलेष्टिप्रयोगः ॥

2693. KUṆḌALEṢṬIPRAYOGAḤ.

Burnell's Catalogue No. 9183 h. Page 24. Left column. Substance—Palm Leaf. Size—14¼ × 1¼ inches Leaves—6 (33-38). Lines—5 or 6 to a Page. Script—Grantha. No. of Granthas—100. Author—(?) Complete

Beginning:

कुण्डलेष्टिप्रयोगः ॥

ज्योगामयावी सर्वायुष्यकामी वा उत्तरया यजेत । अमावास्यायां पौर्णमास्यां वा प्रातरग्निहोत्रं हुत्वा अपरेण गार्हपत्यं दर्भेष्वासीनो दर्भान् धारयमाणः पत्न्या सह विघ्नेश्वरं ध्यात्वा प्राणानायम्य सङ्कल्पं करोति । ममोपात्तसमस्तदुरितक्षयद्वारा परमेश्वरप्रीत्यर्थं पञ्चहविष्कया इष्ट्या यक्ष्ये । चिररोगविमुक्त्यर्थं दीर्घायुष्यसिद्ध्यर्थमिति वा फलानिर्देशः । दर्भनिरसनादि "विद्युदसि ।" ऋत्विग्वरणम् । अग्निविहरणादि "अद्य यज्ञाय रमताम्" "इमामूर्जं पञ्चदशीम्" ऐष्टं हविः । पौर्णमासतन्त्रम् । बर्हिराहृत्य घृतप्रवेशः । "पयस्वति" इत्यादि सप्तदश सामिधेन्यः । "यत्कृष्णोरूपम् ।" ततस्त्वां त्रयोविंशतीया सम्भरामि । वेदं कृत्वोपवेषः ॥

ततः स्विष्टकृदादि आग्नेयवारुणसारस्वतानां विरुन्ध्य प्राशित्रम् । तेषामेव चतुर्धाकरणम् । अन्वाहार्यो दक्षिणा ब्रह्मन् ब्रह्मा संस्थादि प्रकृतिवत् । सूक्तवाके यथादैवतमुज्जितयः । अग्नय इदम् "अग्नेरहमुज्जितिमनूज्जेषम्" । सोमायेदम् "सोमस्याहमुज्जितिम्" । वरुणायेदम् "वरुणस्याहमुज्जितिम्" । सरस्वत्या इदम्, "सरस्वत्याहमुज्जितिम् ।" अग्नाविष्णुभ्यामिदम्, "अग्नाविष्णोरहमुज्जितिम्" । "देवेभ्य आज्यपेभ्यः" इत्यादि । "यज्ञो बभूव" यज्ञशंचमवर्जम् । ब्राह्मणतर्पणान्तम् । इष्टिः परिसमाप्यते ।

हरिः ॐम् ॥

Colophon : Nil.

Subject: Same as No. 2688.

Remarks:—The Ms. is in good condition. For the other works contained herein see Remarks under No. 2152.

॥ जातेष्टिप्रयोगः ॥

2694. JĀTEṢṬIPRAYOGAH.

Burnell's Catalogue No. 9183. Page 24. Left column. Substance—Palm leaf. Size—$14\frac{1}{4} \times 1\frac{1}{4}$ inches. Leavss—5 (39-43). Lines—5 or 6 to a Page. Script—Grantha. No. of Granthas—80. Author—(?). Complete.
only.

Beginning:

जातेष्टिप्रयोगः ॥

पुत्रजननानन्तरं भाण्डस्पर्शादूर्ध्वं कर्तव्या । वैश्वानरं

द्वादशकपालं निर्वपेत् पुत्रे जाते । यदष्टाकपालो भवति गायत्र्यैवैनं ब्रह्मवर्चसेन पुनाति । यन्नवकपालस्त्रिवृतैवास्मिंस्तेजो दधाति । यद्दशकपालो विराजैवास्मिन्नन्नाद्यं दधाति । यदेकादशकपालस्त्रिष्टुभैवास्मिंइन्द्रियं दधाति । यद्द्वादशकपालो जगत्यैवास्मिन् पशून् दधाति । यस्मिन् जात एतामिष्टिं निर्वपति । पूत एव तेजस्व्यन्नाद इन्द्रियावी पशुमान् भवतीति ब्राह्मणम् ॥

End:

हविःशेषोद्वासनादि । सूक्तवाके अग्नय इदम् "अग्नेरहमुज्जितिमनूज्जेषम्" । अग्नये वैश्वानरायेदम् "अग्नेर्वैश्वानरस्याहमुज्जितिम्" । देवेभ्य आज्यपेभ्य इत्यादि । उपस्थानकाले "अगन्म प्रजाम् । प्रजामगन्म सन्दृशस्ते ।" इत्यादि "यज्ञो बभूव" यज्ञशंचमवर्जम् । ब्राह्मणतर्पणान्तमिष्टिः परिसमाप्यते ॥

Colophon : Nil.

Subject : Jāteṣṭiprayoga giving the prayoga details of the Jāteṣṭi which is to be performed by every dvija father soon after the birth of his son for the purity and welfare of the new-born child. The peculiarity of this sacrifice is that the performer of the Iṣṭi does not attain its fruit.

Remarks:—The Ms. is in good condition. For the other works contained in this Ms. see the list under Remarks on No. 2152.

॥ त्रैधातवीयेष्टिप्रयोगः ॥

2695. TRAIDHĀTAVĪYEṢṬIPRAYOGAḤ.

Burnell's Catalogue No. 9157 a. Page 25. Right column. Substance—Palm leaf. Size—15×1⅛ inches. Leaves—2 (1—2). Lines— 6 or 7 to a Page. Script—Grantha. No. of Granthas—45. Complete.

Beginning:

अमावास्यायां पौर्णमास्यां वा प्रातरग्निहोत्रं हुत्वा त्रैधातवीयया यक्ष्ये । "विद्युदसि" । अग्नीन्विहृत्यान्वाधानादि। "अद्य यज्ञाय" । "इमामूर्जं पञ्चदशीम्" प्रथमं वा त्रैधातवीयं हविः । व्रतप्रवेशः । सप्तदश साभिधेन्यः । आमावास्यं तन्त्रम् । वेदं कृत्वा वेदिः । द्वादशकपालानि स्फ्यश्च द्वन्द्वं शूर्पद्वयम् एकमेवोलूखलं मुसलश्च अन्वाहार्यस्थालीवर्जम् । पवित्रकरणादि वेषाय वाम् । निर्वापकाले "इन्द्राविष्णुभ्यां जुष्टं निर्वपामि" इति व्रीहीन्न्वावापान्तं कृत्वा शूर्पान्तरे यवानामप्यन्वावापान्तं कृत्वा ततो व्रीहीन् । सैव देवता । "इन्द्राविष्णू हव्यं रक्षेताम्" इति तन्त्रेणोपसादनम् । "इन्द्राविष्णुभ्यां वो जुष्टं प्रोक्षामि" । व्रीहीनवहत्य यवानवहन्ति नानाबीजवर्मेण । तथैव त्रिष्फलीकरणपेषणे । कपालोपधाने अष्टाभ्य ऊर्ध्वन्तूष्णीम् । व्रीहिपिष्टानि प्रथमं समोप्यान्यस्यां पात्र्यां यवपिष्टसंवापः ॥

End:

हिरण्यं तर्प्य धेनुरिति दक्षिणा। "ब्रह्म पिन्वस्व" इत्यवि-

कारेणोक्त्वा सहस्रधारा उत्सा अक्षीयमाणाः ता दद्यः पृथिवीमन्तरिक्षं दिव··· ताभिर्हिरण्यताप्यधेनुभिरतितराणि मृत्युम्। ब्राह्मणाः इमा वो हिरण्यतार्प्ययेन वः। ब्रह्माणि ब्रह्माणि स्थ ब्रह्मणे वो हुताद्य मामाहिंसिष्ट···हुतासह्मं शिवानि भवत एवं नपुंसकलिङ्गेनोहः। हिरण्यतार्प्यशब्दयोः 'नपुंसकलिङ्गसन्निपाते नपुंसकलिङ्गं शिष्यते' इति व्याकरणस्मृतेः। ब्राह्मणा इमानि वो तार्प्यहिरण्यधेनूनि। नपुंसकलिङ्गपाठं प्रत्यन्तरमतम्(?)। अग्नये हिरण्यमिति हिरण्यप्रतिग्रहः उत्तानस्त्वेति तार्प्यस्य घृताक्तवस्त्रस्य रुद्राय गामिति धेनोः। अत्र "यज्ञो बभूव"। यजमानस्य पुनरन्वाहार्यत्वात् यज्ञशंचमवृष्टिवर्जं ब्राह्मणभोजनान्तम्। ॐ ॥

Colophon : Nil

Subject : Traidhātavīyeṣṭiprayoga, giving the Prayoga details of the Traidhātavīya sacrifice.

Remarks :—The Ms. is in a fairly good condition. The other work contained herein is ' भगवत्स्तुतिव्याख्या.' A transcribed copy of this Ms. is also available in the Library. See Transcript Vol. 276. the date of copying being 1920 A. D.

॥ त्रैधातवीयेष्टिप्रयोगः ॥

2696. TRAIDHĀTAVĪYEṢṬIPRAYOGAH.

Burnell's Catalogue No. 9172 h.

Substance—Palm leaf. Size—16 × 1½ inches. Leaves—2 (78 & 79). Lines—8 to a Page. Script—Grantha. No. of Granthas—15. Author—(?) Complete

Beginning:

॥ त्रैधातवीया ॥

अथ त्रैधातवीयया यक्ष्ये । "विद्युत्"। विहृत्यान्वाधानादि । "अद्य यज्ञाय" त्रैधातवीयं हविः॥ आमावास्यं तन्त्रम् । अन्वाधाय व्रतप्रवेशः । सप्तदश सामिधेन्यः । वेदं कृत्वा वेदिः । द्वादशकपालानि स्फ्यश्च द्वन्द्वं शूर्पद्वयं एक एवोलूखलः मूसलश्च अन्वाहार्यस्थालीवर्ज्यानीतराणि सर्वाणि निर्वापकाले वेषाय वां इन्द्राविष्णुभ्यां जुष्टमिति व्रीहीन् अन्वोप्य यवानपि इन्द्राविष्णुभ्यामित्यन्वावापान्तः । पुनर्व्रीहीनिन्द्राविष्णुभ्यामिति अन्वोप्य इन्द्राविष्णुर्हव्यं रक्षेथामिति तन्त्रेणोपसादनादि ।

End—

ब्रह्माणि ब्रह्माणीस्थो ब्रह्मणे वो मसाहि स्विष्टहुतानि मह्यं शिवानि भवत । नपुंसकलिङ्गेनैवोहः हिरण्यशब्दस्य तत्वात् । ब्राह्मणा इत्यादि । धेनुमि । उत्तानस्त्वेति तार्प्यन् घृतं वस्व० । रुद्रगां, यज्ञो व० ।

Colophon: Nil

Subject: Traidhātavlyeṣṭi Prayoga.

Remarks:—The Ms. is in a fairly good condition. For the other works contained herein see Remarks under No. 2596. This work has not been noticed by Dr. Burnell.

॥ आपस्तम्बनक्षत्रेष्टिप्रयोगः ॥

2697. ĀPASTAMBANAKṢATREṢṬIPRAYOGAḤ.

Burnell's Catalogue No. 3869. Page 25. Right column.

Substance—Paper. Size—11 × 4¾ inches. Sheets—24.

Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—640. Complete (?).

Beginning :

श्रीगणाधिपतये नमः ॥

आपस्तम्बानुसारिनक्षत्रेष्टिप्रयोगः ॥

तत्र बौधायनः ॥

'सा या वैशाख्याः पूर्णमास्याः पुरस्तादमावास्या भवति । सा सकृत्संवत्सरस्यापभरणीभिः सम्पद्यते । तस्यामारभेतेति । अपि वा पूर्णमासीममावास्यां वोपवसेद्यस्यां तल्लक्ष्म सम्पद्यते' इति । अत्र पूर्णमासीग्रहणं आश्विन्यां कार्तिक्यां वा पूर्णमास्यां भरणीयोगे सति । तत्राप्यारम्भौचित्यप्रदर्शनार्थम् । अमावास्याग्रहणं चैत्र्याः पूर्णमास्याः पुरस्तादमावास्यायाः भरणीयोगे तत्रापि तदौचित्याशयम् । फाल्गुनादिमासत्रये यस्यां तिथावपभरणीयोगस्तस्यां वारम्भ इत्यपि प्रायश्चित्तप्रदीपे । अधिकं प्रयोगान्ते वक्ष्यामः ॥

End :

ए० अगन्माहोरात्रार्धमासमासर्तुसंवत्सरानाप्त्वा चन्द्रमसः सायुज्यꣳ सलोकते अहोरात्रार्धमासमासर्तुसंवत्सरानाप्त्वा चन्द्रमसः सायुज्यसलोकते अगन्म० । द्वा० अगन्माहोरात्रातिमुक्तिमहोरात्राभ्यां मदानाप्तिमहोरात्रातिमुक्तिमहोरात्राभ्यां मदनाप्तिमगन्म ।० त्र० अगन्म समानानाꣳ सुभगत्वं प्रियत्वं समानानाꣳ सुभगत्वं प्रियत्वमगन्म । ० च० अगन्म मनुष्याणां नक्षत्रतुल्यतां मनुष्याणां नक्षत्रतुल्यतामगन्म० पं० अगन्म समानानां प्रतिष्ठाꣳ समानानां प्रतिष्ठामगन्म०

ष० अगन्मास्यां प्रतिष्ठामस्यां प्रतिष्ठामगन्म । स० अगन्म यज्ञेऽन्ततः प्रतिष्ठां यज्ञेऽन्ततः प्रतिष्ठामगन्म अगन्म-नक्षत्रसत्रं नक्षत्रसत्रमगन्मेत्यगन्म मन्त्रगतोहाः ॥ शुभानि सन्तु ॥

Colophon: Nil

Subject: Āpastambanakṣatreṣṭiprayoga giving the prayoga details of Nakṣatreṣṭi, according to the Āpastamba School of Black Yajurveda.

Remarks:—The Ms. is in good condition. On the title page is given श्रीशामजीनायक पुण्डयोपनाम्नाम् ' i.e. the Ms. originally belonged to Śāmāji Nāyaka (puṇḍaya).

॥ आपस्तम्बनक्षत्रेष्टिप्रयोगः ॥

2698. ĀPASTAMBANAKṢATREṢṬIPRAYOGAḤ.

Burnell's Catalogue No. 3870. Page 25. Right column. Substance—Paper. Size—10½ × 4⅝ inches. Sheets—18 (9—26). Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—390. Complete.

Beginning :

नक्षत्रसत्र आपस्तम्बप्रयोगः ॥

अथातो नक्षत्रसत्रे देवताकालादि निर्णयः । अथात्र केचिदग्न्यादय एव देवताः न कृत्तिकादयः । केवलाग्ने अष्टाकपालेन बतात्वस्य केवलसौमस्य श्यामाचरौ केवलवि तु (?)द्वादशकपाले देवतात्वस्यान्यत्र दृष्टस्येहाप्यनुसरणौ चितत्वा 'अग्नेः कृत्तिकाः प्रजापते रोहिणी' इत्यादि

वाक्येष्वग्न्यादीनां प्राधान्यप्रतीतेश्च "अग्निर्नः पातु कृत्तिकाः" इत्यत्र पात्विति याज्यायां "सुविते दधातु" इत्येकवचनाभ्यामग्निप्राधान्यप्रतीतेश्चाग्नेः कृत्तिकानाञ्च देवताप्रतिपादकस्वराणां पञ्चसङ्ख्याकत्वेनाग्नीषोमीयविकारत्वमस्य यागस्य स्यात् । ततश्चान्नादो भवतीत्यर्थवादसंवादमन्नादानुमन्त्रणे स्यात् । स्याच्च वृत्रहानुमन्त्रणं नश्वतूर्षाकरणान्ता आग्नेयधर्माः ॥

End:

ऐन्द्राग्नविकाराणां यः कनीयः यथादैवतं द्विवचनबहुवचनेनोहः नुदतां नुदेतां नुदन्तामिति । ममाग्ने पञ्चहोता । हविरुपसादने अग्न्यादिप्रथमदेवताभिप्रायेण रक्षस्व रक्षेथां रक्षध्वमित्यूहः 'उपांशु कामयः इष्टयः क्रियन्ते' इति वचनात् नक्षत्रहविषां उपांशुत्वमापस्तम्बमते । बोधायनस्य तु प्रजापतिः सवितेत्युपांशु । अन्या यथाप्रकृतीति पर्वणि आरम्भ इति ऋत्विग्द्रव्यसम्पादनपूर्वकं नियमेन स्थित्वा, प्रकृतिं कृत्वा, नक्षत्रसत्रेण यक्ष्य इत्युक्त्वा, उदवासाथमथित्वा कृत्तिका नक्षत्रेष्टया यक्ष्य इत्यादि

Colophon:

श्रीवेङ्कटेशाय गुरवे नमः ॥

कपर्द्यनुसारेण नक्षत्रेष्टय उक्ताः ॥

Subject: Āpastambanakṣatreṣṭi prayoga giving the prayoga details of the Nakṣatreṣṭi according to the Āpastamba school of the Black Yajur Veda.

Remarks:—The Ms. is in good condition. This Ms. gives a differ-

ent version of Nakṣatreṣṭi. This is based on the opinion of Kapardi Svāmin a great commentator of the Āpastamba Śrauta Sūtras. This Ms. is full of scriptorial blunders.

॥ नक्षत्रेष्ट्यादिहौत्रप्रयोगः ॥

2699. NAKṢATREṢṬYĀDIHAUTRAPRAYOGAḤ.

J. L. Collection No. 281. Substance—Paper. Size—8¼ × 3⅛ inches. Sheets—19. Lines —6 to a Page. Script—Devanāgarī. No. of Granthas—450. Author— ? Incomplete.

Beginning:

श्रीगणेशाय नमः ।

अथ नक्षत्रेष्टिहौत्रम् ।

तत्र प्रथमा कृत्तिकानक्षत्रेष्टिः । तस्याः प्रयोगः । "नमः प्रवक्त्रे" इत्यादि । सप्तदश सामिधेन्यः । "शोचिष्केशस्तमीमहोम्" । "स्पार्हा यस्य श्रियो दृशे रयिर्वीरवतो यथा । ७ अग्ने यज्ञस्य शोचतोम्" "मदापयः पुर एता विशामाग्निर्मानुषीणाम्" ॥

End:

अथ वैष्णवीनक्षत्रेष्टिहौत्रम् ।

नमः प्रवक्त्र इत्यादि सप्तदश० । महों स्वारुहा यस्य । अदाभ्यः । समिद्धो० । आवाहने आज्यभागावग्निं चावाह्य । * * *

"इदं विष्णुर्विचक्रमे०" । रे ॐ । ये २ यजामहे विष्णुं "प्रतद्विष्णुस्तवते सूर्येण । मृगो न भीमः कुचरो गिरिष्ठाः । यस्योरुषु त्रिषु विक्रमणेषु । अधिक्षिपन्ति भुवनानि विश्वा"

वौ० । अनुनो० । अ..... ॥

Colophon :

इति अदितिनक्षत्रेष्टिहौत्रम् ॥

Subject : Nakṣatreṣṭyādihautraprayoga giving the duties of the Hotṛ priest in the Nakṣatreṣṭi and other sacrifices as the following list of contents of this Ms. shows:—

I	1—14	कृत्तिका to विशाखानक्षत्रेष्टिहौत्रम्	1—22 sheets
II	15	पौर्णमासेष्टिहौत्रम्	22—23 ,,
III	16—20	अनुष to उत्तिराषाढेष्टिहौत्रम	23—30 ,,
IV	21	अभिजिन्नक्षत्रेष्टिहौत्रम्	30—31 ,,
V	22—29	श्रवण to भरणीनक्षत्रेष्टिहौत्रम्	31—41 ,,
VI	30	अमावास्येष्टिहौत्रम्	41 st sheet
VII	31	चान्द्रमसीष्टिहौत्रम्	42 ,,
VIII	32	अहोरात्रेष्टिहौत्रम्	43 ,,
IX	33	औषसीष्टिहौत्रम्	44 ,,
X	34	नक्षत्रेष्टिहौत्रम्	45 ,,
XI	35	सूर्येष्टिहौत्रम्	47 ,,
XII	36	अदितीष्टिहौत्रम्	48 ,,
XIII	37	वैष्णवीष्टिहौत्रम	49 ,,

Remarks :—The Ms. is in a fairly good condition.

॥ पवित्रेष्टिप्रयोगः ॥

2700. PAVITRESṬIPRAYOGAḤ.

Burnell's Catalogue No. 3871. Page 25. Right column.

Substance—Paper. Size—10¾ × 4¾ inches. Sheets —2.

Lines—13 to a Page. Script—Devanāgarī. No. of Granthas—50. Author—(?) Complete.

Beginning:

अत्र पवित्रेष्टिः ॥

इह प्रायश्चित्तप्रकरणे पवित्रेष्टिकथनं याजमानपत्न्योः संवत्सरातिप्रवासे प्रायश्चित्तार्थम् । यथाह गोपालः— " वत्सरातिप्रवासे तु पवित्रेष्टिस्तयोर्भवेत् " इति अभिशस्तोऽभिशस्यमानो वा पापक्षयकामो वा पवित्रेष्ट्या यजेत । एतयेष्ट्या यक्ष्यमाणो दक्षिणार्थं शतमानं सम्पादयेत् । मृगारेष्ट्या उक्तः काल एवास्या अपि कालः ॥

End:

अभिशस्तो अभिशस्यमानो वा एतयैव यजते । एतयेष्ट्या दश पूर्वान् दशावरान् आत्मानं चैकविंशं पङ्क्तिं पुनाति । अथाप्युदाहरन्ति—

वैश्वानरीं व्रातपतिं पवित्रेष्टिं तथैव च ।
ऋताऋतौ प्रयुञ्जानः पुनाति दशपूरुषान् ॥

Colophon:

इति पवित्रेष्टिः ॥

Subject: Pavitreṣṭiprayoga giving the prayoga details of the Pavitreṣṭi which is to be performed by every dvija householder for the purification of his own self and wife when he happens to be away from his house—Agnyāyatana—once a year. This Iṣṭi, if performed as a rule in each season (Ṛtu) purifies the performer as well as ten of his (past)generations.

Remarks:—The Ms. is in good condition.

॥ पवित्रेष्टिप्रयोगः ॥

2701. PAVITRESTIPRAYOGAH.

Burnell's Catalogue No. 3872. Page 25. Right column. Substance—Paper. Size—$11\frac{1}{8} \times 4\frac{7}{8}$ inches. Sheets—2. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—30. Author—? Complete.

Beginning

अथ पवित्रेष्टिप्रयोगः ॥

सर्वपापक्षयार्थं पवित्रेष्ट्या यक्ष्ये । "विद्युदसि" । "अद्य यज्ञाय" । "इमामूर्जं पञ्चदशीम्" । ऐष्टं हविः । पौर्णमास्यं तन्त्रम् । सप्तदश सामिधेन्यः । अलङ्कृत्य परिस्तरणम् । "देवा देवेषु" । प्रणीताप्रक्षालनात्पूर्वम् गार्हपत्यमाज्यं विलाप्योत्पूय जुह्वा चतुर्गृहीतं गृहीत्वा हवनीये जुहोत्यन्वारब्धे यजमाने "येन देवा ०। पुनंतु मा स्वाहा" ॥

End:

आज्यहविषां उज्जितिर्न विद्यते । समानं कर्मा पत्नीसंयाजेभ्यः पुरस्तात् गृहपते स्रुवाहुतीरुपजुहोति । "यद्देवा देवहेडनम्" इत्येतेनानुवाकेन प्रत्यृचं हुत्वा । देवतागणहोमे उक्ताः । यज्ञो बभूव यज्ञचमवर्जम् । ब्राह्मणतर्पणान्तम् । सन्तिष्ठते पवित्रेष्टिः ॥

Colophon:

पवित्रेष्टिः समाप्ता ॥

Subject: Same as No. 2699.

Remarks:—The Ms. is in good condition. This Ms. gives a different version of pavitresti. Compare No. 2699.

॥ पवित्रेष्टिप्रयोगः ॥

2702. PAVITRESTIPRAYOGAH.

Burnell's Catalogue No. 9172 g. Page 25.. Right column. Substance—Palm leaf. Size—16×1½ inches. Leaves—3 (76—78). Lines—8 to a Page. Script—Grantha. No. of Granthas—34. Author—(?). Complete.

Beginning:

ॐ मृगारेष्टिवत्पवित्रेष्टिः । न शाखा । पौर्णमास-तन्त्रम् । पवित्रं हविः । ततस्त्वां त्रयोविंशतिधा । "परिस्तृणाति"। "देवा देवेषु" "कर्मणे वाम्" । पात्र० ले० चतुश्चत्वारिंशत् कपाल....पुरापां प्रणयनात् । आपस्तम्बमतात् गार्हपत्याज्यं विलाप्योत्पूय । अन्वारब्धे यजमाने आहवनीये तिस्र आज्याहुतीर्जुहुयात् ।

End :

अथ याज्यानुवाक्या अग्न आयूंषि पवसेऽग्ने पवस्व स्वपा । उत नः प्रिया प्रियस्विमाजुह्वानायुष्मदानमोभिः सनः पावकादिति वोग्ने पावकरोचिषा आ विश्वदेवम् । सत्पतिं न प्रमिये सवितुर्देव्यस्य तत् अग्निः शुचिव्रततम उदग्ने शुचयस्तव । आ वायो भूषशुचिपा उप नः प्रयाभिर्यासि "दाश्वांसम् ।" "त्वमग्ने व्रतपा असि" "यद्वो वयं प्रमिनाम व्रतानि" "दधिक्रावणो अकारिषम्" दधिक्रा । शवसपञ्चकृष्टिं वैश्वानरोऽर्जाजनत् । पृष्टो दिवि त्वषद् । ते विष्णवास आकृणोमि प्रतत्ते अद्य शिपिविष्टनामेति क्रमेण दशदेवतानां याज्यानुवाक्या स्विष्टकृतस्तु "जुष्टो दमूनाः ।" भोजनानो ऋषतां हविरग्ने शर्धमहते

सौभगायेति संयाज्ये शेषं सर्वं समानम् ।

Colophon :

पवित्रेष्टिप्रयोगः समाप्तः ।

Subject: Same as No. 2700.

Remarks :—The Ms. is in a decaying condition. For the other works contained herein see the Remarks under No. 2057. This Ms. gives a different version of Pavitresṭi. Compare Nos. 2700 & 2701.

॥ पवित्रेष्टिप्रयोगः ॥

2703. PAVITRESṬIPRAYOGAḤ.

Burnell's Catalogue No. 9183 g. Page 24. Right column. Substance—Palm Leaf. Size—14½×1¼ inches. Leaves—10 (23-32). Lines—5 or 8 to a Page. Script—Grantha. No. of Granthas—160. Complete.

Beginning :

पवित्रेष्टिप्रयोगः ॥

"वैश्वानरीं व्रातपतीं पवित्रेष्टिं तथैव च ।
ऋतावृतौ प्रयुञ्जानः पुनाति दशपूरुषम् ॥"

इति वचनात्सर्वपापक्षयद्वारा स्वर्गावाप्तेः पुरुषस्यावश्यमनुष्ठेया पवित्रेष्टिः । प्रतिसंवत्सरं ऋतावृतावनुष्ठेया । अमावास्यायां पौर्णमास्यां वा प्रातरग्निहोत्रं हुत्वा ब्राह्मणाननुज्ञाप्य अपरेण गार्हपत्यं दर्भेष्वासीनो दर्भान्धारयमाणः पत्न्या सह विघ्नेश्वरं ध्यात्वा प्राणानायम्य सङ्कल्पं करोति । श्रीविष्णोराज्ञयेत्यादिवर्षायनऋतुमासपक्षतिथि-

वारनक्षत्राणि सङ्कीर्त्य मम उपात्त + श्रीपरमेश्वरप्रीत्यर्थं समस्तपापक्षयार्थं यज्ञेश्वरप्रीत्यर्थं पवित्रेष्टया यक्ष्ये। तेन परमेश्वरं प्रीणयानि। एवं पत्नीसङ्कल्पं करोति।

End :

"इमं मे वरुण श्रुधीवहत्वमद्याचमृडय। त्वामवस्युराचके स्वाहा।" वरुणायेदम्। "तत्त्वा यामि ब्रह्मणा वन्दमान-स्तदाशास्ते यजमानो हविर्भिः। अहेडमानो वरुणेह बो-ध्युरुशंसमान आयुः प्रमोषीः स्वाहा।" वरुणायेदं०। "त्वं नो अग्ने वरुणस्य विद्वान् देवस्य हेडोऽवयासिसी-ष्ठाः। यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषांसि प्रमु ध्यस्मत्स्वाहा।" अग्नीवरुणाभ्यामिदम्। "स त्वं नो अग्नेऽवमो भवोति नेदिष्ठो अस्या उषसो व्युष्टौ। अव य-क्ष्व नो वरुणं रराणो वीहि मृडीकं सुहवो न एधि स्वाहा॥" अग्नीवरुणाभ्यामिदम्। "त्वमग्ने अयास्ययासन् मनसा-हितः। अयासन् हव्यमूहिषेऽयानो धेहि भेषजं स्वाहा।" अग्नये अयस इदम्। गृहपतियागादिक्रमेण कपालोपास-नम्। यज्ञो बभूव यज्ञश्च चमवर्ज "वृष्टिरसि"। ब्राह्म-णतर्पणान्तम्। इष्टिः परिसमाप्यते।

Colophon : Nil.

Subject : Pavitreṣṭiprayogaḥ—Same as No. 2700.

Remarks :—The Ms. is in good condition. For the other works contained herein see the Remarks under No. 2152.

॥ पवित्रेष्टिप्रयोगः ॥

2704. PAVITRESṬIPRAYOGAḤ.

Burnell's Catalogue No. 3941. Page 25. Right column. Substance—Paper. Size—10 × 4⅜ inches. Sheets—5. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—60. Author—?. Complete.

Beginning :

श्रीगणेशाय नमः ॥

पवित्रेष्टिप्रयोगः ॥

अस्या इष्टेः सप्तदशसामिधेन्यः । पावकवन्तावाज्यभागौ । अग्निः पवमानः सरस्वती प्रियाग्निः पावकः सविता सत्यप्रसवोऽग्निः शुचिर्वायुर्नियुत्वानग्निर्व्रतपतिर्दधिक्रावाग्निर्वैश्वानरो विष्णुः शिपिविष्टश्च प्रधानदेवताः ।

End:

यजमानस्य नामनी व्यावहारिकनाम नक्षत्रनामनी । "आयुराशास्ते" इत्यादि संस्थाजपान्तम् । ओंचमे स्वरश्चमे० तस्मै ते नमः ॥

Colophon :

पवित्रेष्टिप्रयोगः सम्पूर्णः ॥

Subject : Pavitresṭiprayogaḥ—Same as No. 2700.

Remarks :—The Ms. is in good condition.

॥ पवित्रेष्टिप्रयोगः ॥

2705. PAVITRESṬIPRAYOGAḤ.

Burnell's Catalogue No. 3942. Page 25. Right column. Substance—Paper. Size—10 × 4⅞ inches. Sheets—4.

Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—60. Author—(?). Complete.

Beginning, end, colophon and subject—Same as No. 2704.

Remarks :—The Ms. is in good condition.

॥ पवित्रेष्टिप्रयोगः ॥

2706. PAVITRESTIPRAYOGAH.

Burnell's Catalogue No. 3943. Page 25. Right column. Substance—Paper. Size—$10\frac{1}{8} \times 4\frac{7}{8}$ inches. Sheets—3. Lines—14 to a Page. Script—Devanāgarī. No. of Granthas—60. Author—(?). Complete.

Beginning, end, colophon and subject—Same as No. 2704.

Remarks :—The Ms. is in good condition.

॥ पवित्रेष्टिप्रयोगः ॥

2707 PAVITRESTIPRAYOGAH.

Burnell's Catalogue No. 3944. Page 25. Right column. Substance—Paper. Size—$10\frac{5}{8} \times 4\frac{3}{4}$ inches. Sheets—3. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—50. Author—(?). Complete.

Beginning, colophon and subject—Same as No. 2704.

End:

अग्निः शुचिरिदम् । वायुर्नियुत्वानिदम् । अग्निर्व्रतपतिरिदम् । विष्णुः शिपिविष्ट इदम् । अग्निर्वैश्वानर इदम् । दधिक्रावा इदम् । देवा आज्यपा इत्यादि समानम् ॥

